वचनश्लिष्टशब्दयोजनयैवेति। विषयांतरेति। विवक्षितविषयेत्यर्थः अवस्था। जागत्स्वप्नादिरूपा। वदंतीतिपद्योप
त्तरिसखोधियासखीभ्रमेणजारवृत्तांतेस्वकामुकवार्तांवदतीधूर्ताकाचितुपतिंवुधासखीत्यादिवाक्यशेषमपूरय
त्पूरितवतीतिसखीतिपुनः संबोधनंमर्तायितासूचनाय। ततः कं वृत्तांतानंतरे प्रबुद्धा जागरणवती। अत्रचनासेव
ग्रदुष्टस्यावृत्तांतः किंतुस्वाप्निकइत्यवस्थाभेदयोजनयापन्हवः सखीमित्यादिवाक्यशेषेणाप्रकाश्यतेकैतवापन्हु
तिरिजलक्ष्म निर्दिष्टुः। व्याजादेःपदैर्निन्हुतेर्थेक्तो अपिच्छन्नोसत्यांकैतवापन्हुतिरितिव्यवहर्तव्यमित्यर्थः कैतव

५भिन्नो

अ

नापन्हुतिर्व्युत्पत्तेः व्याजादेरित्यनेनमिषकपटछलछद्मकैतवादयोगृह्यंते। एवंचकैतवपदिपदघटितायापन्हुतिलक्ष
क्षणेबोध्यं। नाराचाः बाणाः दक्पातः कटाक्षः अपन्हवः निषेधः प्रतीपइति। ध्यासत्यत्वस्यविषयबाधाधीनत्वादि
तिभावः। रिक्तेति। ग्रीष्मवर्णेनांतरवोवृक्षः वारिणोजलस्यकथयवर्तयापिरिक्तेषुशून्येषुविपिनस्यारण्यस्यो
दरेषुमध्यप्रदेशेषुजलंत्रार्थयंते प्रार्थयंते। कीदृशाः मध्यान्हेजृंभितः प्रवृद्धोयोमहानातपः धर्मस्तेनत्याजापस्तेनंतेत
प्ताः संतप्ताः किंकृत्वा स्कंधांतरात्प्रकांडांभ्यंतरात्ऽत्थितोयोदावाग्निर्दावानलस्तस्यशिखाज्वालातस्याश्छ
लेनजिव्हांप्रासार्यतिच्च स्त्रीप्रकीडस्कंधस्याम्मूलाच्छाखावधिस्तरोरित्यमरः अत्रनेयंदावाग्निशिखाअपितुजिव्हे
तिछलपदात्प्रतीयते। अत्रचानन्विहिवाच्यतादोषनिरसायकथायापिवनोदरेष्विति पठनीयं॥ ॥इत्यपन्ह
तिप्रकरणं॥ ॥उत्प्रेक्षांलक्षयति संभावनेति। अत्रोत्प्रेक्षेत्यनंतरं साद्विविधेयध्याहार्यं। तथावसंभावनेति
उत्प्रेक्षापदवाच्य... भावस्तुहेतुफलरूपेण त्रिधेत्यर्थः वस्तुहेतुफलानांसंभावनाधर्मत्वंस्वविधेयकत्वसंबंधे
नातेनवस्तुहेतुफलाविधेयकत्वेनेतिपर्यवसितोर्थः वस्तुत्वेनहेतुत्वेनफलत्वेनवांच्छितंयत्तद्भिन्नत्वं। नातिवस्तु
त्वस्यकेवलान्वयित... विभागासंगतिः नक्त्यादि। अत्रआसामुत्प्रेक्षणामध्येआद्यावस्तूत्प्रेक्षातत्केसानुक्तोक्ता।

तया१

१ सिस्या ३ छानिमित्तेन अ प ३ न्यस्य अन्यविषयकं अन्यस्य विषयिणस्ता दात्म्येन संभावनं मिस्यर्थः। अन्यस्य विषय धर्मविशिष्ट

नुक्ते आस्यं देशस्य इति विग्रहः॥ आस्पदं चोत्प्रेक्षायाः धर्मिरूपो विषयः॥ सिद्धेत्यत्र विग्रहः॥ पूर्ववत्। धूमेति तमः॥ कोकी विरहः॥ थविशिष्ट
ध्माणाधूमस्तोमशंकेइत्यन्वयः॥ कोकः कस्य चक्रवाकस्य स्त्री कोकी तस्या विरह रूपेणाशुशुक्षाणोऽग्नि नासंबधिनं धूमसमूह
२० मित्यर्थः॥ लिंपतीवेति अत्र तेन तिमिरं सह इति च कर्तृपदं रक्तेति विद्यादिति यितं प्रतिनाबकस्योक्तिः॥ नवमृदलोसकुमो
रवंघ्री चरणो धवंश क्रविक्षेपणाद्धेतो॥ रक्तं त्वर्णाविति। त्वन्मुखेति पद्मगतया त्वन्मुखं तत्क्छाया हेतुभिन्ने त्यर्थः॥ वैरायइ को
मेचे ति। वैरं करोती त्यर्थः॥ शब्दवैरहं कलहाश्च कण्वेस्य॥ करणाइति कड् मध्यइति मिध्यसागः॥ कुचयोः धृत्यै धारणार्थं क
नकस्यदाम सि॥ रज्जोभिरतिति निगीर्याध्यवसानरूपातिशयोक्त्या बली सिद्धः॥ किमित्यर्थः॥ प्रायइति। अक्तं क
धा प्रायः॥ बद्धद्वैत्वाच्चारणेन सह हेकंपं प्राशुंतो येजलेतपस्थितितपश्चरती त्यर्थः॥ कर्मणोरोमंथतपो घ्यावर्ति वरोतिकड्तप॥ प स॰
रस्मैपदंत्वीति परस्मैपदं। लक्षणं परिष्कुरुते अन्यधर्मेति। अन्यस्य विषयिणो यो धर्मस्तत्संबंधरूपोऽयि ताधर्मितारूपा वि
यि षयिणा इति षष्ठ्यर्थस्तु विशेषणतारूपा विषयता अन्यत्वेनोल्कीर्तनेच संभावनाया आहार्यता उत्प्रेक्षेति पर्यवसि
तु तां तन्निष्ठधर्मसंबंधप्रयुक्तमाहार्यतत्संभावनमिति निष्कर्षः॥ इतरांशस्याद्यावर्तकतया स्वरूपकथनमात्रपरत्वात्
मुखं चंद्रमंचेत इत्युत्प्रेक्षायां चंद्रनिष्ठाह्लादकत्वादिधर्मसंबंधप्रयुक्तमुखे चंद्रसंभावनमाहार्यमस्तीति लक्षणास २०
अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा। सूचनायां तथाच विषयिनिष्ठ धर्मसंबंधप्रयुक्तविषयधर्मिक तादात्म्यस्य संसर्गेण विषयिविधेय

२२ नि १ इ १ ति ४

न्यथा नयेनेनापन्हवः॥ अस्या साकारस्य हेर्बंतरवर्णनेन गोपनमिति॥ तव्योंबिन्हवैति। तालिकनिषेधेइत्यर्थः॥ नूपुरो मंजीरः मंजी
रो तु पुरोस्त्रियामित्यमरः। नर्मसखी क्रीडासखी। अत्र कांतपरायाः प्रजल्पेमत्पदेलग्नइत्युक्ते नूपुरतात्पर्यकत्ववर्णनेन कांतत्वा
पन्हवो मुख्यः। नूपुराभेद प्रतिपत्तिस्तु तदंगमिति बोध्यं। सीकारमिति। सीकारं तदनुकारिमुखध्वनिं। क्षिस्यति। अधरस्त्व
धरोष्ठः। व्रणः क्षतिव्रणोस्यास्तीति व्रणी व्रणिनं करोतीत्यर्थे तत्करोतीति णिच्। तथा रोमांचेत नो विस्ताखतीति वाक्यद्वयं श्री
नारिका भिप्रायेण प्रियसखीं प्रति कया पार्श्वे तदाकर्ण्य नागरिकः किमुलितइति शंकितवतीमन्यांप्रति तच्छंकानिवृत्तये न
हिनहीत्यादिना हैमंतिकपरत्ववर्णनेन तालिकस्य नागरिकस्यापन्हवः। शीत्कारशिक्षादिकर्तृत्वस्य नागरिक इव पवने
सत्वात्तत्तदाह। अर्थयोनिति। विवक्षिताविवक्षितसाधारणस्यार्थस्याविवक्षितार्थसंबंधित्ववर्णनेत्यर्थः। इदमि
त्यदाहरमिणोति। व्रजात्यभिप्रायेणोक्तवचनं हेमंतप्राप्तान्तत्रभवद्इत्यर्थे सर्वचाणस्वतंत्रपद्यो लिणीत लोपेन हेमन लो
इति रूपसिद्धिः। प्रजल्पन्निस्युदाहरणे एकस्य वाक्यस्यान्यथा योजनमिहत्वनेकेषामिति भेदः। शब्दयोजनयेति
अर्थदैन्ये विशाख्य श्लेषमात्रेणेत्यर्थः। पद्मेति। क्रीडाया विटो भोक्ता कृष्णो वो युष्मान्पातु रक्षत्विति संबंधः। की
इ

चसाध्यवसानलक्षणयोपादानादसंगतेः। उक्तविषयमेवेति सकृदुपात्तरिताभ्यां लिंपतीति वर्षतीत्याभ्यां तयोर्लेपनवर्षणा
ध योःसाध्यवसानलक्षणया च साधारणधर्मपुरस्कारेण व्यापनस्य चोपस्थानस्य युगपद्वृत्तिद्वयविरोधेनासंभवादि
त्याशयः स्मृतेः। निरुक्तस्मृतेः उत्प्रेक्षणीयतया। उत्प्रेक्षा विषयतया। अन्यत्रोत्प्रेक्षायां अन्वयासंभवादिति
ता ।निराकांक्षत्वादितिभावः। अत एव। आख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्वयासंभवादेव। कश्चिद्भूत एव व्युत्तर न्यत्र
वत्वा। व मयमस्यानन्वयः प्रमादेन लिखितो दृश्यते। न्यग्भूते इति। कर्मणाभूत इत्यर्थः। स्वक्रियेति। क्रियाप्राप्तिसाधनत्वेना स्व
न्वित इत्यर्थः। उपेक्षिते। आकांक्षिते। नालं। न समर्थः। तथा च निराकांक्षत्वादुपमानत्वेनापि च योन संभवतीत्यै त
त्तिभावः। एतेन तमसि लेपनकर्तृत्वकल्पेक्षणमित्यलंकारसर्वस्वकारमतमपास्तं। तस्याः प्रकर्तृविशेषणत्वा
त्। विवक्षितविवेकेन लेपनस्यैवोत्प्रेक्षितत्वात्। एवं च प्रधानक्रियात्वलेपने क्रियागोचरसंभावनैव निगीर्णव्याप
नविषयेति सिद्धं। न च युगपद्वृत्तिद्वयविरोधः शंक्यः। तदनभ्युपगमात्। केचिदिति मत इति चारवारसेद्भाव
नांतर्भूजेतु तमानमसि। कर्तृत्वेन विषयत्वेन च वारद्वयमन्वये क्लेशः। तथा धर्म्युत्प्रेक्षा साधर्म्यप्रयुक्ता। धर्मो
त्प्रेक्षा तु तत्सहचरितधर्मसंबंधप्रयुक्तेति लक्षणायाननुगमः। न च तन्निष्ठतत्समानाधिकरणान्यतरत्वेन

५ चंद्रप्रकारिका च संभावनाना तादात्म्यसंसर्गिकेव तथानुभवात् चमत्कारप्रयोजकस्य
५ त्ससगां तरस्याभावाच्च नच्चय

न धर्मनिवेशान्नाननुगम इति वाच्यं। सर्वत्र साध्यत्वेहस्य निमित्ततया एवोत्प्रेक्षायां। संभवेनान्यतरत्वादिनिवेशप्रयुक्तगौ
रवस्यानुपादेयत्वादिति। हेतुत्वेनेति। हेतुरूपतयेत्यर्थः। हेतुत्वसंभावना। हेतुरूपतासंभावना। फलत्वेन फलरू ता
म पतया। एवमग्रेपि बोध्यं। अयंदाहतास्रुत्प्रेक्षासु बाधः प्रकारः प्रदृश्यते। तत्र धूमस्तोममित्यादौ कोकांगनाविरहान
लसंबंधिधूमस्तोमाभिन्नतमो विषयासंभावनेति बोधः। नामार्थयोरभेदात्। एवं मुखचंद्रमन्य इत्यादावपि नूनं न्वया
मुखं चंद्रः इत्यादौ तु चंद्रप्रकारकसंभावनाविषयो मुखमिति बोधः। मुखनिष्ठैकैवाचंद्रत्वप्रकारिकात
स्य चंद्रोपसर्जनत्वात्। एवं ध्रुवेवादिशब्दसमभिव्याहारेपि बोध्यं। लिंपतीवेत्यनुक्तविषयोत्प्रेक्षोदाहरणेतु
लिंपतिना साध्यवसानलक्षणया लेपनव्यापनोभयसाधारणधर्मेण सांद्रमलिनीकारकत्वादिनारूपेणोपस्थापि क
नान्च तेन साध्यव्यापने लेपनसंभावनाविषयात्। सांद्रमलिनीकारकं तमः कर्तृकांगधर्मकंपलेनप्रकारसंभावनाविषय इति बो
दीप धः। अंजनयापरिच्छिते व्यापने तादृशसंभावनान्वय इति प्रतीकृतः। एवं वर्षतीत्यादावपि बोध्यं। विक्षेपणातिक्रवमित्यादिहेतु
त्प्रेक्षोदाहरणे हेतुः पंचम्यर्थः। तत्र चाभेदेन प्रकृत्यर्थान्वयः। हेतोश्च स्वप्रयोज्याश्रयत्व संबंधेन रक्तत्वविशिष्टेन

प्रकारितासंबंधेन संभावनायां तच्छेस्वो विषयतयान्वितैश्चरणयोरन्वयः॥ तथा च प्रकृत्याधिकरणकविक्षेपणाभिन्नहेतुकस्कम्प
२२ कारकसंभावना विषयान्वितेत्र्रा इति बोधः॥ न च तादात्म्यसंबंधेन हेतुविधायकत्वाभावेन नये हेतूत्प्रेक्षा स्यात्॥ किंतु तादात्म्येन तथा
पो विधेयत्वे सरवे प्रेक्षैवेति वाच्यं॥ विवक्षितविवेकेन विक्षेपणे हेरवे भेदस्यात्र क्षिणीयत्तया विशेषणप्रतीति विशेषस्वस्या पि हेतो
विधेयत्वोपगमात्॥ मुखचंद्र इत्यादौ रूपक इवानुयोगित्व मुखस्याभेदस्यां विक्षेपणसंसर्गत्वाभ्युपगमेन च विक्षेपणे हेत्व
भेदभानसंभवात्॥ हेतुविशिष्टस्वरूपोत्प्रेक्षायां मुखत्वः प्रतीतावपि विवक्षावशेन हेतूत्प्रेक्षात्वेनैव व्यपदेशः॥ यथा दध्नाजुहोती
त्यत्र मुखत्वोद्दधिविशिष्टहोमविधिप्रतीतावपि विवक्षितविवेकेन होमभेदधित्वव्यपदेश इति बोध्यं॥ न च स्वप्रयोज्यत्व सं वि
बंधेन स्वप्रयोज्याश्रयत्वेन संबंधेन वा हेतुरूपधर्मोत्प्रेक्षैव रक्तादौ स्वीक्रियतां हत मीदृश कल्पनाक्लेशेनेति वाच्यं॥ न
दनात् स्वप्रयोज्यत्वधर्मोत्प्रेक्षांगीकारे दूषणस्य प्रागेवावेदितत्वात्॥ अत एव हर्षोल्लासमन्येललिततनुतेपादयोः लक्ष्मी पम
रिति हेतूत्प्रेक्षामुदाहृतवंतः॥ प्रकाशकृतोपि तत्र हर्षहेतुकलग्नत्व तादात्म्य संभावनमेव स्वाभाविकलग्नेऽभिमतं
असमङ्कारीत्यातुलक्ष्मीरूपविषयेयथोक्त हर्षहेतुकलग्नतादात्म्य संभावनमुचितं लग्नस्य [illegible] धर्मस्योपसर्जनत्वेन २२
या संभावनायामन्वयोगादितिध्येयं॥ एवं च मुखाद्येच्छ्येच्य सिद्धहेतुविषय हेतूत्प्रेक्षायामपि बोध्यं विषय सिद्धत्वाभ्यां बो
धविशेषाभावात्॥ मिथ्यः॥ किमित्यादि फलोत्प्रेक्षास्थले फलं चतुर्थ्यर्थः॥ तत्र चाभेदेन प्रत्ययार्थेऽन्वयः॥ पूर्ववत्॥ फलस्य च प्रयोजकत्व
२ यामपि नातिव्याप्तिः॥ तस्या अनाहार्यत्वात्॥ सं- द्र २ भावनं यदीत्यर्थस्यादित्यूहोन्यस्यासिद्ध्यय इति वक्ष्यमाणसंभाव २ पुरस्तो १
न्वयः॥ बाधाघसावस्थायां तु जायामानामुखादौ चंद्रादिसंभावनानोत्प्रेक्षितितद्वारणायाहार्येति॥ एतेन विरक्त संध्या पुरुषैः रवेह्वयारजःपा
र्थिवमुज्जिहीते॥ शंके हनूमत्कथित प्रवृत्तिः प्रत्युद्ययौ तो भरतः ससैन्यः॥ त्यत्र रजो भिरोद्गमनरूपस सैन्य प्रत्युद्गत धर्मसंबंध प्रयुक्तो
वे यांभारितत्संभावनालंकारविषयया द्विशेषाद्यक्काकथितास्युगणात्त्वेत्यादावतिव्याप्तिवारणाय प्रयुक्तातिसर्वातिशयितसौंदर्येश रे
वारणा के सत्यवतो मुखं येन सा मृगशावाक्षी सावित्रीति रलिहितेत्यादावतिप्रसंगोयतन्निष्ठातिसंसाध्यमानत्वेन धर्मविशेषणांतत्रैव सा
वृत्तिरि त्रीतरलीकारकत्वरूपधर्मे मुखवृत्तिनेतु संभाव्यमाने [illegible] दिकावस्तुहेतुफलात्मतावस्तुहेतु [illegible] तादात्म्ये नातिव्या
ननु संबंधांतरेणोत्प्रेक्षायास्संग्रहः इति चेन्न॥ सर्वत्राभेदेनैवोत्प्रेक्षणमिति प्राचीनमतानुसारेणोत्थमभिधानात्॥ एतल्लक्ष
अत्र णायैवलक्षणे च नादात्म्योपादानमिति॥ नन्वलंकारसर्वस्वाकाराद्विविधस्वरूपोत्प्रेक्षेतिव्यवहृतायास्करीयाया अपिसे क्षे
त्रि त्वाद्विविधत्युक्तमित्याशंक्याह॥ अत्रेति॥ आसामध्येयात्प्रथमा वस्तूत्प्रेक्षा सेवस्वरूपोत्प्रेक्षेत्युच्यत इत्यर्थः॥ वस्तलेस्योति र
स्ये प्रसरणशीलत्वेत्यर्थः॥ तमस इति संभावनेत्येनेनान्वितिः॥ षष्ठ्यार्थो विषयतात्तमोविषयेत्यर्थः॥ प्रतिरोधकत्वादीत्यादिपदात्प्र
सरणशीलत्वस्य संग्रहः॥ प्रियेः पतीर्विघटिता वियुक्तः॥ चापनस्येति षष्ठ्यां तस्य पूर्ववदुत्प्रेक्षापदेनान्वयः॥ एवमग्रेतनस्या
तमस इत्यस्यापि॥ अनुपादानादिति विषयी वाचकाभ्यां लिंपतिवर्षतिपदाभ्याम्येनानुपादानादित्यर्थः॥ यथा श्रुतेत्ताथ्यामे

स्य यात् ४ ५लोकोत्तरस्याः परिच्छिन्नतायाः
निध

अनायिषं तवनीताइव। यथा गोपालेन परकीया भिगोभिर्मिश्रा ४ स्वीया गावो नीयंते तथा गोपद्वारा स्वसजात्येन मिश्रनीतावि वस्त्वनपि
नीताइवेत्यर्थः ४ खलु संभावनायां तेन नयनेन हेतुना इदमोध्यंनत्वेधकारित्यन्वयः ४ गो ४ स्वर्गे चले वद्रस्मो सकुलिशपुमानुखो सो ब
रश्मयी दृग्वाणाहग्वाग्भूषु पशुभूमिषु। सितमिदिनी। अत्र वानायिषं तवेति विषयोपक्षेपणपूर्वकं तस्य हेतुत्वेनोत्प्रेक्षणाभिति पूर्वस्मादुद्द४
एवं पूर्वत्र इच्छयेति गुणरूपो हेतुरिहहेतुक्रियारूप इत्यपि दृष्टव्यं ४ अत्र वाक्येक्षाद्यर्थत्वे पिहितत्प्रेक्षायाः प्राधान्येन वक्यर्थप्रदर्शनातुख स
अंग रूपोत्प्रेक्षात्वेन तस्योतत्वात्। एवमन्यत्रापि बोध्यं पूर्वमिति। अयोविधुश्चेद्दस्पयोधेः पूर्ववर्धयेतु रम्यमणिं चेद्रकांतकिं पयोसि णोके
दोग्धीति शंके तथा प्रियेऽपि तातो वियोगि वियोग सति सशोकानां कोकांगनानां नयनेकमंभूतेकियंति पायांसि दोग्धीति शंके इत्यन्वयः ४ दु
द्धि हे द्विकर्मकत्वादेणां कर्मत्वेपामिति। द्वितीया। एवं नयतेरित्यत्रापि मध्यमीकमित्यत्रे कस्य बद्धत्वस्य फलत्वेन कवधतेतु वर्धते लवेप
पामित्तुद्रावणसावणस्त्रवणयोद्वयो ४ फलत्वेन पूर्ववर्धनस्य तद्दितिभेदः ४ दहनं। वृद्धिनी। तदा। वर्द्धनकूलेतेन। चंद्रेणारथस्थि
तानामिति रवि४ रथस्थितानां नियुक्तानां पुरस्तनानां। वाहतानामश्वानां परिवर्तनायेव तुरगोत्तमानामुत्पन्निभूमावुत्तरस्यां दिशि
प्रतस्थे इत्यर्थः ४ प्रायो ज्येत्यत्रैकस्य गुणस्य फलत्वेनोत्प्रेक्षणाभित्तु परिवर्तनक्रियाइति भेदः ४ नन्वलंकारसर्वस्वकारादिभि
व रन्येषामपि जात्यादिभिर्भेदानामुक्तत्वात्कुतस्तेन प्रदर्शिता इत्यत आह। एतावते ति। उक्तोदाहरणेवेत्यर्थः ४ उत्प्रेक्षा इत्यनंतरं चमत्कारविशेष शंका
प्रयोजिका इति शेषः ४ तथा च जात्यादिभेदानामपि चमत्कारविशेषानाधायकत्वाद्प्रदर्शनमिति भावः ४ ईदृसेति। इत्यनेनोत्प्रे स्तु
(नां

(क्रि ५ विषयास्वर्गगा

क्षाबोधकत्वेनेत्यर्थः ४ त्वकीर्तिरिति। अत्रानुपात्तस्वर्गगमनो विषयः प्रवेशतादात्म्योत्प्रेक्षा विशेषणीभूतक्षमणत्वं हेतूत्प्रेक्षा
वाप्रतीयत इति बोध्यं॥ ॥ इति श्रीमत्तत्सदुपाख्यावैद्यनाथकृतायामलंकारचंद्रिकायामुत्प्रेक्षाप्रकरणं॥ ॥ अति
शयोक्तिं लक्षयति। रूपकातिशयोक्तिरिति। निगीर्णानुपस्थानविषयस्यैति विषयिणा रूपमस्य तत्स्यभावस्तत्तात्यर्थः ४ रूपं च भेद त
ताद्रूप्यान्यतरत् तस्मिन्सतीति सद्भावमंतत्तद्ग्रिहित्यत्र प्रायेणा। एवं चानुपात्तविषयधर्मिकाहार्यो निश्चयो विषयी भूतवि प
त षय्यभेदताद्रूप्यान्यतररूपप्रकारकोतिशयोक्तिरिति लक्षणं बोध्यं। अत्र रूपकवारणायानुपात्तेति। अयमेव च रूपकादस्या विशेषः ४ ते
अतिशय इत्युक्तैतत्त्वातिवारणाय तत्त्वयेति। उत्प्रेक्षावारणाय निश्चयेति नीलोत्पलेति। अत्र नीलोत्पलपदात्तत्साध्यवसानलक्ष
णया शक्यलक्ष्योभयानुगतकोतिविशेषादिपुरस्कारेणोपस्थितस्य नीलोत्पलत्वविशिष्टस्याभेदसंसर्गेणान्वयः। शक्यु
परिच्छिन्नयोः ४ कृतीष्टसाधनत्तयोरिव शक्तिलक्षणाभ्यामुपस्थितयोरर्थैकपदार्थयोस्तात्पर्यवशेनान्वयोगीकारे बाध भेद
व कत्वाभावात्। एवं च नीलोत्पलाभिन्नकीर्तिविशेषद्वयदृष्टादिति बोधादियमतिशयोक्तिरित्युच्यते। नन्वेवमभिरूपकादेवेलक्षण्य मै
मिति वाच्यं। रूपको विषयोभिदर्थाद्यस्य विषयतावच्छेदकस्य मानेनैव लक्षणपरस्यस्फुटत्वात्। यद्वा लभेदसानितात्प र्य
र्य किंतु भेदसानेन तदाकीर्तिविशेषादिरूपताद्रूप्यस्य विषयतावच्छेदकबोधताद्रूप्यातिशयोक्तिर्व्यलस्यत इति बोध्यं।
५ स्थितेकामिनी ८नयनेज्ञात्युपस्थितस्य

२४ वापीति।मध्यभागमारभ्यमुखपर्यंतंनाभिकां।गूर्वर्णनमिदं।गगनेसूक्ष्मतयातद्बलूडुलेख्यमध्येकापिश्यनीवर्णनीयशोभावापीतिंद्वं
भीरागमारभ्यमुखपर्यंतंनाभिस्फुरति।शोभते।तत्परंतद्बुधभागेऐंद्रनीलीइंद्रनीलीघटितासूक्ष्मापद्यासरणिस्तद्बलूर्ध्वभागेरोमावलिर्यु
र्गतात्यनुषज्यतेकिंभूता।कांचननिर्मितासोपानपंक्तिःतत्सदृशा।त्रिवलीमधिगतवतीप्राप्तवती।तथाग्रेतदूर्ध्वदेशेशोभतेतद्बलूर्ध्वविशा
लौकुचौस्फुरतइति।विसक्तिर्विपरीतगामिनसंबध्यते।कीदृशौस्फुरतौ।पुण्यवतांकगम्यौकलशौगमौ।नच।कलभौच।पुनःकीदृशौ।चंद्रन लो ना
तरौस्पंदनपंकेनचाविछिन्नौच्चावितौदेशायर्यौस्थितौ।तत्रत्यानीतदा।श्लिष्टानीचकुधौशोभेतद्वदाल्हादकत्वमुखत्वसन्निधानादमृतं
साध्य तद्वदाशयमेधरमाधुर्ययुक्तलसामित्यन्वयः।विधानांभेदानांइतीत्यस्यप्रतद्भेदानांमित्यनेनान्वयः।अतिदेशेनविभागस्यनेत्यर्थः।मुखरू
रूपक पकाभेदस्यातिशयोक्तौवभावाद्रूपकपदंसंदृशपरंयासस्यामासस्यांग्निहोत्रंजुहोतीत्यत्राग्निहोत्रपदवद्भूमातिदेशकमित्याशयः।अधि मणमा
वयन्यूनतेत्यत्रानुसयोक्तौरुक्तोदाहरणेषुप्रसिद्धतरत्वादनुपादानंबोध्यं।यत्वत्रकेचित्तद्रुक्ते।विषयिवाचकपदस्यविषयसाध्यवसानल
श क्षणायाःकृतावच्छेदकमात्रप्रकारकलक्ष्यविशेष्यकबोधत्वंकार्यताक्च्छेदकं।एवंचनिगरणसर्वत्रविषयितावच्छेदकधर्मरूपेणवविव
न व्य षयस्यभानेविषयेविषयित्वेननिश्चितेऽभेदातिशयोक्तिस्तादृथातिशयोक्तिरितिद्विविध्यंमयुक्तमिति।तत्रौढविलसितंशक्यतावच्छे ग्रस्त २४
म दकस्यलक्ष्येपूर्वप्रतीत्यनियततयांतद्विशिष्टतयालक्षणायाअसंभवात्।यद्धर्मविशिष्टेशक्यसंबंधस्तद्धर्मप्रकारकलक्ष्योपस्थितेः
समानप्रकारकेशाब्दबोधेहेतुत्वात्।लक्षणापरिहार्ययात्रानुपत्तिंपत्तेस्तदवस्थत्वाच्च।एवमपितात्पर्यवशात्तादृशबोधांगीकारेतदृशा
तस्ये

अ

बाब संसर्गेणाद्धुलेनतद्दूरेणोकेतेनैवबद्धत्वान्नुयक्तताताद्रात्म्यसंसर्गकसंभावनायामध्येविषयतया।एवंचकुचधारणंभिन्नफलेकेन क
कदामकरणकबंधत्वाश्रयसंभावनाविषयामध्यइतिबोधः।एवंप्रयोजेमित्यादावपिफलंतुमनोरथइतिपूर्ववदेवबोधः।फलोत्प्रेक्षा
त्यो त्वेबोधोपदर्शितरीत्योपपादनीयमितिबहुवक्तव्येपिविस्तरभयाद्विपरम्यते।बालेंदुवक्राणीति।नविद्यतेविकासोयेषांतानि।अविकासीनि
स तेषांभावात्।किकारेहितत्वाद्धेतोः।बालेंदुवत्।द्वितीयाचंद्रवत्।वक्राणितथातिशयेनलोहितानिआरक्तानिपलाशानिपलाशकुसु
न मानिवसंतेनायकेनसमागमंप्राप्तानांवनस्थलीनांमंगनानांसद्यस्तत्कालसंभूतानिनखक्षतानीवबभुःशुशुभिरइत्यन्व
यः।पूर्वेति।धूमस्तोममित्यत्रेत्यर्थः।ननुलोकेसंभावनायाःमिवशब्देनदृष्टत्वैइत्यतआह।अस्मिंचेति।पिनष्टीवेति।सम
द्रस्तरंगाणामग्रभागेःफेनरूपंचंदनेपिनष्टीव।इंदुलत्फेनचंद्रनमादायकरैः।किरणैःशैलमपांगनाःलिंपतीवअनुलिंप
तीवेत्यर्थः।समुद्रापोतीति।समुद्रस्योपांतितटेयत्फेनंचंदनंतत्कंतेयन्नारांदिशांलेपनेतत्वेनेत्यर्थः।उभयत्राभयोरुत्प्रे
क्षयोः।येषांअलंकारसर्वस्वकारादीनां।रात्रावीति।सप्रकोतः।प्रभुः।भूपतिः।भूमौरात्रौरवेरभावाद्धेतोरिवेसतते
भिरंतरंमुप्रदितेप्रतापयशसीसृष्टवान्मिमीतिवा।नित्यर्थः।रक्तावित्यदाहरणेभावरूपोहेतुरिहत्वभावरूपइतिभेदः।वि
वस्वतेति।विवस्वतासूर्येणस्वस्यगोसहस्रेणकिरणसहस्रेणसमंमिश्राःमिश्रिताःजनानांनेत्रापरनामधेयागावोपि
३ दिवाचेंदोरभावात्सोतोरिव

त्रि

त्कोदाहरणे घ यामिति विषयस्योपादानं तत्कथमयं श्लेषयोक्तिरिति चेदत्राह ॥ इदं खस्याविषये यो विशेषणत्वो विवक्षातदा रूपकमि निश्च ६४

वक्ष्यतएव प्रकाशकृतादशमरूपकातिशयोक्त्यादिसंदेहसंकरेनयनानंददायिनी यदि विंबमेतत्प्रसीदतीत्युदाहरणे हत्तमिति न विवक्षयाम तिशयोक्तेरे पतद्विषय विनोपात्तेन

एनो विषजता यच्चापह्नुतीति अपह्नुतिगर्भत्वे पर्यस्ता गर्भापह्नुतिगर्भत्वं सेवा रूपकातिशयोक्तिरेव तथा चसापह्नुतिवत्त्वेनरूप

नापि न्हवत्वमेत्र्यनात्रिविधातिशयोक्तिरिति सावः ॥ मुक्तामिति अनुभवैकवेद्या निइमानिवस्तुनितइमजनाः विकल्पयंतिसह सदृति वि

कल्पविषयी यो पणि कुर्वतियथाननानासा प्रकृतासुन्दरी हकुपथे लोचनमार्गे नास्तीत्यन्वयः ॥ तादृशी सुन्दरी दर्शनशालिनैवि

कल्पयंतीति सावः ॥ तानि कानि वस्तूनितत्राह मुक्तामौक्तिकं विद्रुमं प्रवालं चांतरा अनयोर्मध्ये मधुरकररसः ॥ अंतरांतरेण यु स्तुन

त्कोइति द्वितीया पुष्पं परिके वलं धूर्वहं सारवाहकं ननु मधुरस युक्ततया मुक्ता विद्रुमयाः खलु निश्चिते प्रालेयद्युतिमंडल

का चंद्रमंडले एकासि एकस्मिन्नासिके अवस्थितेः ॥ एकाधिकरण्यमित्यर्थः ॥ नत्वपि समुद्रे वै नन्वेचंद्रमंडलं चशंख

स्य मूर्ध्नि मस्तके न दधेति न दधत्प्राप्नोति न पुनः पूर्वाचलस्य स्योदयगिरस्थ्यं नरेतदधत्तीति अत्र मुक्ताविद्रुममधुर

रा रसप्रालेयद्युतिमंडलशंखैः ॥ क्रमेण दंताधरतन्माधुर्यमुखकंठानि गीर्णानि ॥ पूर्वोदाहरणाधांतत्वात्तयास्यष्टा - पन्ह्नवः ॥

इहतु परं धूर्वहमित्युक्तया गूढइति सिदः ॥ आलेयं मिहिका चेत्यमरः ॥ गता स्विति पुरे सवाः योर्यस्तास्तका विलासिनी धुतिमी

१ सर्ग २

स नामत्त्यांनां संघटनेनैसंभ्रमैर्यंतीरप्रीतिगता स्कसतीषुयत्रयंत्रनगरे वेशिप्रदानदीठल्लसंतीनां फेनततीनां छलेन प्रयु

तथा क्तः ॥ अट्टहासः ॥ उच्चैतहास्यं यथापूतेवविभातीत्यन्वयः ॥ इतीति इत्यत्रेत्यर्थः ॥ इंदुमंडलाद्वाविद्यादि पदान्पुष्परसा

[illegible] दिपरिग्रहः ॥ सन्त्यादिपिचेति स्त्रि त्रिमाधुर्यादिपचव्यर्थः ॥ आदिना अधरमाधुर्यादिपरिग्रहः ॥ निवेशनात् अपिदाध्यवसना

त् जानेइति दमयंती वर्णयतोनलस्योक्तिः ॥ अतिशमिनाद्रागाल्लोहित्यादि मधुरस्वरूपमेव विंबमिति जाने नतु बिंबफला इति

मित्येवकारार्थः ॥ बिंबस्य बिंबफलस्य अतिसमदोष्ठाधरत्वं निरुक्तत्वं च यत्तत्स्फुटं । कथं तर्हि विपरीतालोके प्रसिधिस्तत्रा

हाद्वयोरनयोर्विशेषस्य तारतम्यस्य बोधे अक्षमाणा मसमर्थानां जनानां नाम्नि भ्रमो विपर्यासः अस्तु अन्यत्रेति सूर्यक

न्हकेनेत्रापरपर्यायगोनयनेइत्यर्थः ॥ निवेशितानत्त्रेक्षितं खीरा विणासंतत्वोजगः ॥ तस्य द्वेगृत्वा प्यक्षान्वें धूनि

तियावत् धुवेप्रायो बाधितुं सरः प्रविशमिन तु स्यात्तु स्थानार्थे हीयस्माद्रजस्य स्नाननि ॥ फलनिष्प्रयोजनमि

त्यन्वयः ॥ प्रसक्तानुप्रसक्तेति अतिशयोक्तेः ॥ सापन्ह्नवतत्त्वयः नप्रसंगादलंकारसर्वस्वकृदुक्तं स्वरूपोत्प्रेक्षायांशाधा

पन्हुवतिगर्भत्वं दर्शितं नटनुप्रसनया च त्रिविधास्वप्युत्प्रेक्षासापर्यस्तापन्हुतिगर्भत्वं त्यर्थः ॥ सदकोतितस्यैव रज्जा त्रि

सि.२ ४संबधस्याभेदक्षि[illegible]त्वे सत्यन्यत्वाद्यनिरूपितोग्राह्यः।ते नरूपकातिशयोत्त्यादिप्रभेदेषु नातिव्याप्तिः ४

तीयस्यैवाभ्युत्ववर्णनं।तज्जातीयभिन्नत्वेनवर्णनं।तच्चाहार्यबोध्यं।अएवयोपितेनध्वांतौनातिव्याप्तिः४।इयंचलोको
२६ त्तरत्वंप्रतिपैर्यं।अन्यदेवेति।अस्यमहीपतेगांभीर्यमन्यदेवप्रसिधगांभीर्यभिन्नत्वैमेवेत्यर्थः४।अन्येयमिति।रूपेसौंद
र्यवैदग्ध्यंचातुर्यंधोरणीयपरिपाटीएषानलिनपत्राक्षी।विधेः४साधारणीमृस्टिष्विनेत्यन्वयः४।अत्रोत्तरार्धेनत्रृसंपाऽन्य
त्ववर्णनोविशेषः४।संबधेति।अयोगेऽसंबंधायोगकल्पनं।संबंधवर्णनं।सौधेति।सौधास्त्रीराजसदनमित्यमरः४
।नन्वत्रैवस्पृशंतीवेंदुमंडलमितीवपदप्रयोगेऽत्प्रेक्षाप्रतीतिस्तत्प्रयोगेगम्योत्प्रेक्षात्वमुचितं।इवादित्वेयावाच्योत्प्रे स
क्षासैवेवाद्यभावेगम्योत्प्रेक्षेतिनियमात्।अन्यथात्वत्कीर्तिर्भ्रमणश्रांतेत्यादिपूर्वोदाहृतेयद्योपिगम्योत्प्रेक्षान
स्या स्याद्विशेषाभावादितिचेन्मैवं।उपदर्शितनियमस्यालंकारांतराविषयएवाभ्युपगमात्।अन्यथान्यनंमुखंचं नू
द्रइत्यादौन्यूनमित्यप्रयोगगम्योत्प्रेक्षापत्तेः४एवंचप्रकृतेऽसंबंधेसंबंधरूपातिशयोक्त्यालंकारविषयेनगम्योत्प्रे वर्णनं
क्षावसरः४त्वत्कीर्तिरित्युदाहरणेतुभ्रमगम्योत्प्रेक्षापत्तेः४पश्रांतत्वरूपहेतुत्वंगम्योत्प्रेक्षाभिप्रेतानतुस्वर्गगा
प्रवेशांशइतिसर्वमेवदातं।असंबंधमुदाहरणांतरमाह।यथावेतिकतिपयेति।वीररुद्रदेवरथ्येनृपेवितरणशालि
निदानशालिनिसतिचक्रवाकीइतिमुदंसंतोषमुपयातिप्राप्नोति।इतिकिंकुतंवासरस्यावसानेनाशोयेनस४कन २६

देवशाकयाभिदप्रकारकबोधेपिबाधकाभावान्मावपदेनविश्लेषणाद्भेदकस्यैवंयावर्तनादितिदिक्।साधावधेति।विधशालाभंजिका
ख्यायांनाटिकायांस्फुटिकप्रकारशिखरगतांमृगांकावलीमाकपूतोराज्ञेविदूषकंप्रत्युक्तिः।स्थंप्राकारायसमीपेनैनयनेप्रीहिणु
प्रेहरया।मनाकुइषन्निकेयाअनाकारीअनंतीरक्षेकोयंशीतीकर[illegible]चंद्रइतिमुखेचंद्रगतत्वादद्कोरित्वरूपताद्रूप्याध्यवसानं।की
दृशः४गलितम्भुतोहारिणायस्मात्तथाभूतः४तेननिः४कलंकतयोराशी।त्वकषीभिच्यात्कः४पुनः४कीदृकुसाधायांबुधः४असत्तदभिला
प सन्नेपोयैस्तैरुवनसबौदविभ्यकारैरनुसृतांलवल्याः४फलयाकस्यत्रपाभिनिसिदृशी।अच्छां।स्वच्छां।ज्योत्स्नांतद्वेनाध्यवसितांकीर्ति
प्रभांकिरन्प्रसारयन्नित्यर्थः४लवलीलताविशेषोहरफारेवडीतिभाषाप्रसिद्धिः४प्राकारोवरणः४सालइत्यमरः४।क्वचित्पाठेऽस
मबधयासैरितितत्राप्युक्तएवार्थः४नवललवलीर्गीतालीलैनानितिपाठनवस्यासौलवलियाकस्येतिअचयेबोध्यः।नविवाभेद
विवक्षैवकिंनस्यादतआह।अत्रेति।कोयमित्यनेनानिर्ज्ञातत्वप्रकाशनात्प्रसिधस्यचानिर्ज्ञातत्वात्तद्वैलक्षण्यावगतिरितिभावः४
ते गर्भितः४गलितेत्यादिविशेषणांचैर्यत्विनाभिप्रेतः४अन्यत्रापीति।अनुष्टुभि।छिद्यैदेवरपरिदलितोराकुदर्शनेः४कलंकेनाश्लिष्टो
नखलुपरिस्फूतोदिनकृता।कुहूभिर्नोलुप्तोनच्युवतिवक्रेपाविजितः४कालानार्थः४कोयंकनकलतिकापामुदयतइत्यादवि
त्यर्थः४अथवान्यत्रापिन्यूनतायामपीत्यर्थः४कोयमभिमतश्चंद्रइत्यादावविद्यत्वरूपन्यूनताप्रकाशनमूहनीयमितिभावः४।ननू
ने

वलय॰ तेषां। ऊर्मिका अंगुलीयकं तस्यैव कंकणपदप्राप्तिरूपकार्यवर्णनेन द्वारेण मक्षवत् इत्यर्थः। ऊर्मिका त्वंगुलीयस्या हस्त
सगंतरयोरिति विश्वः। कार्यमुखेनेति। अंगुलीयकस्य कंकणपदप्राप्तिरूपकार्यवर्णनद्वारेणेत्यर्थः। आदातु
मिति। सहजं सौकुमार्यवत्या विरहदशायां तदतिशयवर्णनमिदं हंतेति खेदे। आदातुं गृहीतुं सकृदेकवारमपि
कुसुमे इष्टे ते सति अधीरदृशः हस्ताय मालोहितं भवतीति शेषः। अपि ना किमु गृहीता मिति गम्यते। ला
क्षया यत् रंजनं तद्वर्त्तया पि सह सा अ कर●त्यादयोरलं रक्तं भवति किमु रंजने नेति पूर्ववत्। एवं मंगानां चंद
नादिना यदनुलेपनं तत्स्मरणमपि अत्यंतखेदकरं किमिचद्दुर्गमिति शेषः। अलकानि मिगरु धूपाद्यामोदा धृता नुलेपन
पिभारायते भार इवाचरतीत्यर्थः। कर्तरि क्यङ्। अत्रादानादिरूपहेतुप्रसक्तिमात्रेण हस्तार्यलोहित्यादि
रूपकार्योत्पत्तेः साक्षाद्वर्णनं न तु कार्यमुखेनेति पूर्वस्माद्भेदः। हेतुकार्ययोरिव हेतुप्रसक्तिकार्ययोरपि
समकालत्वं संभवतीति सूचयितुमुदाहरणांतरमाह। यामीति वदति सति त्वयि तत्कालमेव तन्वं
ग्याः पुरो वलयानि अभिर्मकं कंणानि पुरः प्रथमं गलितानि। अपराण्यपि तथैव तत्कालमेव दलितानि नि
सन्नानीत्यन्वयः। पुरो ग्रे प्रथ●मे च स्याद् इति विश्वः। अत्र वदतिगलितानीति शतृप्रत्ययेन समकालतावगतिः।

अवे

अत्यंतेति। अत्र हेतुकार्ययोरित्यनुवर्तते। तयोः पौर्वापर्येति क्वचित्पाठः। साधु रेव। व्यतिक्रमः पौर्वापर्यं रीत्यं। अये प्र
थमं अनुनीता समाहिता। कवीन्द्राणामिति कविश्रेष्ठानामंगणसंबंधिन्यो भूमयः। प्रथमतर मिति प्रथमम
वचलता चपलानां भृंगाणां भ्रमराणां भ्रमरपामासंगेनाकुलानां किरणां मृदजलस्यामोदेन परिमलेन मधु
रा रमणीया आसन् अभवन्। पश्चात्तदनंतरं तेषां कवीनामुपरि रुद्रसंज्ञस्य नृपतेः अभिदृश्यमानाः कटाक्षाः प
य तिताः। कीदृशाः। क्षीरमुदकं यस्य तथाभूतस्य क्षीरार्णवस्य प्रसरंतीनामुरुवीचीनां महत्तरंगाणां सहचराः सद
शा इत्यर्थः। उदकस्योदसंज्ञाया मित्युदादेशः। अत्र नृपतिकटाक्षरूपकार्यमुखेन नृपतिप्रसादरूपहेतूत्कथ
अ नं पूर्वस्माद्विशेषः। एतावुदाहिताः। अयोक्तेषु प्रकारेष्वनुगतप्रवृत्तिनिमित्तत्वाभावात्कथमतिशयोक्तिपद
प्रयोग इति चेत्। अत्राहुः। तावत्प्रभेदान्यतमत्वमेव सर्वानुगतमतिशयोक्तिपदप्रवृत्तिनिमित्तं तदेव सामा
न्यलक्षणमिति। तानवोऽस्तु निगीर्याध्यवसानमेवातिशयोक्तिः। प्रभेदांतरत्वेनानुगतरूपाभावादयं कालं
कारांतरमेव न वाच्यत्वादिप्रभेदेषु अन्यत्वादिषिरा भिन्नवस्तुप्रतीतेर्वचमत्कारित्वेनानुभवसिद्धतयाऽन्य
अन्यत्वादीनां दिभि रभेदादीनां निगरणं संभवतीति वाच्यं

६ चमत्कारप्रधानतया तद्व्यपदेशो भवति तथा अतिशयोक्तेर प्राधान्येन व्यपदेशो न हेतुत्वात्
६ प्राधान्येन व्यपदेशा भवतीति न्यायात्। अ अलंकारांतरणामेव

२८ त्वादिरसेदप्रतीत्यंगीकारेऽनुभवासंगतेः। अभ्युत्तमत्वेनालंकारविभाजकोपाधितोभजतो प्रयोजकत्वादिति। वस्तु
तत्तदनुपात्तविषयकचमत्कृतिजनकप्राधान्यपरोनिश्चयविषयत्वमेवातिशयोक्तिसामान्यलक्षणं रूपकवारणायसत्यं चमत्कारा
दृ तोत्प्रेक्षांतिवारणायाहार्येति। उत्प्रेक्षानिरासाय निश्चयेति रूपकातिशयोक्त्यावसदृश्याद्वितीयप्रभेदस्य लक्षस्यततीयं
संबंधस्यचतुर्थः असंबंधस्यत्वेपंचमस्य सहत्वस्य षष्ठहेतुप्रसेरोक्तिजन्यत्वस्य सप्तमस्य पूर्वापरत्वयोश्चतथाविधारोपविषयत्व
सत्वात्सर्वत्रलक्षणासमन्वयः। ननैवंविधारोपस्यरूपकस्वाभावोक्तिष्विन्नेषुप्रायशः सर्वालंकारेषुसत्वादितिप्रसं
चमत्कारे गइतिवाच्यं। इष्टापत्तेः। अलंकारांतरणामेवप्रधान्येनव्यपदेशार्हत्वात्। अतएवप्रकाशकृता विशेषालंकारप्रसं
गे। भिहितं सर्वत्रैवंविधविषयेतिशयोक्तिरेवप्राणत्वेनावतिष्ठते। तांविनाप्रायेणालंकारत्वाभावात्। अतएवोक्तं य
न सैषासर्वत्रवक्रोक्तिरनयार्थोविभाव्यते। यत्नोस्यांकविनाकार्यः कोलंकारोऽनयाविनेतीति। दंडिनाप्यलंकारांतराणांअतएवविरा नया कैश्च
यामर्थिकमाहुः परायणं। वागीशमहितामुक्तिमिमामतिशयाह्वयामिति॥ ॥इतिश्रीमत्तत्सदुपाख्यवैद्यनाथ
कृतालंकारचंद्रिकाख्यायांकुवलयानंदटीकायामतिशयोक्तिप्रकरणं॥ ॥छ॥ तुल्ययोगितांलक्षयतिवर्ण्या
नामिति। वर्ण्यत्वेनोपमितत्वेन प्रस्तुतानामित्यर्थः। इतरेषां अप्रस्तुतानां एतच्चाप्यस्य भूपसाधारणं। वर्ण्यानामेवाइत् २८

व तरणा४

कगिरिः कमेरुः कांतिपर्यैरल्पैर्दिवसैः क्षयं प्रायाय इति। संभावनायां लिङ्। योगेपीति। योगे सत्यप्यर्थयोगवर्णनामि
त्यर्थः। स्वर्गस्थाद्रुमाः। कल्पवृक्षादयः। खड्गे मे खितिविषयसप्तमी। खड्गेमीविषयेयुत्रादरस्तस्य संबंधेपि अर्थादर्थि थी
षु। यद्वा अर्थिषु खड्गेमीविषयादरसंबंधाभावप्रतीतोत्समानीविज्ञेयतया खड्गे मेघवादरविषयत्वाभावावगमा नं
व द्यथाश्रुतमेवसाधु। अनयोरिति। अनेद्या। निनिद्धष्वान्यंगानियस्यास्तथाभूते इतिसंबोधनं। उक्तसमाणयोर्वर्धमा
नयोः सानयोल्लवबाकुलत्वयोरंतरमध्येपर्याप्तः। अवकाशोनास्तीत्यन्वयः। अत्र बाकुलतयोरंतरस्तनपर्याप्ता
ववकाशासंबंधेपितत्संबंधनक्तः। अक्रमेति। क्रमः पौर्वापर्यंतदभावोऽक्रमः तद्रूपस्यातिशयोक्तिरित्यर्थः
सहत्वेतिसमकालत्वे। आलिंगंतीति। समंयुगपत्। द्यामोर्वी पृथ्वीचपराः शत्रवः मंक्ष्वतीति। हम्मीरसंज्ञकस्य
वीरस्यखड्गकोशोपिधानेमवतीतिसतिअरीणांवर्गः समूहोपिकोशंभांडारंमुचंति। तथाखड्गप्रकंपेमल्लासनेभुज
तिसतिसप्रकृष्टंकंपंभजति। एवंखड्गेक्षमांक्षांतिंत्यजतिसतिसोपिक्ष्मांपृथिवींत्यजतीत्यर्थः। कोशोस्त्रीकुड्म
लेखड्गपिधानेर्थौघदिव्ययोरित्यमरः। अत्रशतृप्रत्ययसंग्यायोगपद्यवर्णनं विशेषः। धनगृहेति। धनसंबं
धिगृहेइत्यर्थः। चपलेति। हंतो प्रसीकेर्ज्ञानेतज्जन्यकार्यसतीत्यर्थः। यस्यामीतिनदितेनकेप्रियेणेतिशेषः

व्यतु

क त्तिमालंबसेभवत्वे वे तुसं तु सवान् एवमथ भावस्यकथं गणबहिर्भाव४॥ जातिक्रियाद्रव्या तिरिक्तस्यैवतु घ्यीश ब्दानां
प्रवृत्तिरितिवदद्भिर्वैय्याकरणोक्तदनुसा शिभिश्चालंकारिकै गणत्वांगीकारात्। अतएवजातिगुणैर्भावि रोधप्रकाशह
द्रिरुदाहृतामिरयोथनुत्पत्तिपुजइति। तथा विधानार्थेनाति अमंद४सावभौमिति। वल्कवल्कलक्षणमितेन रूपेण
धर्मस्याभिवेशो भिप्रेतइत्याविदितमतोनकाथनुपपत्तिरिति॥ स्वैरिणी। स्वनइहैतु शीलमस्यास्तादृशाथ्यभिचा रि
रिणीतियावत्। स्वादीरिरिणोरितिवृद्धि४। स्वैरिणीपांसुलाचस्यादित्यमर४। संजातानि। दिना निपद्मानिवृ
ध्धिमीयु४प्रापु४कीदृशानिसंजातानि४पत्राणांप्रकारै४समूहैरंरचितानि॥ पूर्वपत्राणां वसंतेन विगलनात्। तथास्फु
टाविकसिता४पाटलवृक्षविशेषायेषुतेषांभावस्तत्वंसमुद्वहंतीतिशत्रंतंदधानानीत्यर्थ४पद्मपक्षेतुस्फुटानिविक
सितानिस्वतानिपाटलवर्णानितेषांभावस्तत्वमित्यादिपूर्ववत्। एवमर्कस्यकरै४किरणैरभिमर्शनाद्धिकस्वराणिभास्करानि
द्मानि पद्मानि विकसितशालीनि। नागेंद्रेति नागेंद्राणांगजश्रेष्ठानांहस्ता४शुंडा४कदली विशेषाश्चपरिणाहोविशालतातं शी छ
लिरूपंस्वरूपंलब्धापियया क्रमंत्वचिकर्कशा त्वक्कठोरत्वात् एकांत्येननियमेनत्याज्ञहेतौलोकेतस्या४पार्वत्यानवी
रूपमानात् बाद्याष्ठजपमानत्करहिताइत्यर्थ४ तदीयत्वेनेतितत्कालिकत्वेनेत्यर्थ४॥ ग्रीष्मकालिकवल्कवर्णनस्येव

ज्ञो ज्ञौर२

वसंपा४

ग्रीष्मवर्णनरूपत्वादितिभाव४। एकक्रियेति वृद्धिप्राप्तिरूपैकक्रियान्वय४इत्यर्थ४एकगणेति। तपमानबाह्यत्वरूपैक
गणेत्यर्थ४। हितादितेइति हिता हितोविषयेइत्यर्थ४वृत्तितौल्यमितिवृत्तिर्वर्तनंव्यवहारमितियावत्। तस्यतौल्यंसाम्यं अप र
रापूर्वोक्तविलक्षणा प्रदीयतइति पराभुत्कृष्टाभूति४संपत्तिरेवपराभूति४पराभव४शत्रूणांसमूह४शात्रवंतस्यतस्यतौल्य
साम्यं। अपरापूर्वोक्तविलक्षणा। प्रदीयतइति। पराउत्कृष्टाभूति४। समूहइत्यण्। पराभवोवानस्येति शत्रुसंबंधिपराभवदानस्ये दान
त्यर्थ४पराभवस्यमुख्यदानंसंभवात् अतएवसंप्रदानत्वासंभवा मित्रशात्रवयोरितिसंबंधसामान्येषष्ठी। श्लेषेणाप ध
न्ना रापूर्तिपदश्लेषेण। यथावेति। अन्न चवौ श्रुत्यर्था विरोधद्योतका४। अत्रेतियोपि निबंपरशुना छिन्नस्तियोष्यूनेनमधुकेन यु
यो नसार्पिषाज्येन सिंचितितैथिनंतयोथमाल्यादेरत्वेनातिक्रमेणेत्यर्थ४। नन्क्तप्रकारकैस्यतुल्ययोगितापदवाच्यत्विवृध्धसंम
तिंदर्शयतिइयमिति। तथाचवृद्धिव्यवहारान्नानार्थस्कुल्ययोगिताशब्दइतिभाव४अत्रकेचिदाहु४नेयंतुल्ययोगि
तांपूर्वोक्ततुल्ययोगितातोभिदमहेति। वर्ण्यानाभितिरिषांचेत्यादिपूर्वोक्तलक्षणाक्रांतत्वात्। एकानुपूर्वइखो धितवल्क
कर्मकदानपात्रत्वस्यपरंपरयातादृशशब्दस्यवोधमस्येवयात्। यस्त्वनिवभित्यत्रापिकटुत्वाविशिष्टनिंबस्येवपरेपर
याछेदकसेचकपूजकधमत्वसंभवादितितदेतत्पेशलं। तथाहि। यत्रानेकाद्रैइत्वेनज्ञातोधमस्तेषां मोपम्यग

न्वे पम्य

७ भानमत्तीस्याग्रहस्तथा ७ तु

कत्वेनचमत्कृतिजनकस्तत्रपूर्वोक्तप्रकारस्यत्रीहिताहितोभयाविषकश्लाघाश्लासरूपैकव्यवहारस्यव्यवहर्त्तृगतत्वेनैदाय ति
३० तरयोतकतयाचमत्कृतिजनकत्वंतत्रापरइतिभेदात् नत्वत्रपराष्टतिशब्दस्यतदर्थकर्मकदानस्यचापरंपरयाशत्रु
मित्रगतत्वेनसाक्षमपितुश्लेषवलादेकत्वेनाध्यवसितस्यतादृशदानस्यराजगतत्वेनैवेतिकथंपूर्वोक्तलक्षणाक्रांतत्वे
एतेनयश्चनिबर्केभित्यत्रकटुत्वविशिष्टनिंबस्यैवपरंपरयाछेदकसेचकपूजकधर्मत्वमिरस्तं।वस्तुगत्यानधर्मत्वस्या ति
लंकारतासंपादकत्वाभावात्‌ अन्यथासंकुचंतिसरोजानीत्येनावत्तेवक्रुल्ययोगितालंकारापत्तेः किंत्वनेकगतत्वेन तु
मात्र ज्ञार्यधर्मत्वस्यैवतुल्ययोगिताप्रयोजकत्वमितितदभावेतदंतर्गतिकथनमसमंजसमेव।अथाथुक्तोदाहरणेयो असंगत
स्तयोपिनपूर्वोक्तलक्षणस्यात्रासंभवः॥धर्मो र्थेपूर्णश्रीरवाधिराजन्विराजतइतिप्रकृतयोरूपमायामति द्र
व्याप्तिवारणार्थमनेकानुगतधर्मत्वपर्याप्तविषयितासंबंधावच्छिन्नावच्छेदकताकचमत्कृतिजनकताश्रयज्ञा
भिति नविषयधर्मत्वविवक्षायास्तत्रावश्यकत्वात्‌ प्रकृतेचाहितत्वादेर्विषयस्याधिकस्यानुप्रवेशादितिविभावनी हिता
यंगुणोत्कृष्टैरिति।गुणेः उत्कृष्टः श्रेष्ठास्तैरित्यर्थः।सम्यक्‌हत्यसाम्यंविवक्षित्वावत्तइति।वचनंवचःप्रतिपाद
धारण नमितियावत्‌।अर्थात्तत्साधर्मस्य।अन्येति।धर्मस्यावर्ण्यवर्ण्यगतत्वादुक्तलक्षणत्यर्थः।पाशोस्यास्तीतिप्राशी ३०
वरुणः प्रचेतावरुणः पाशीत्यमरः श्रीदः कुबेरः।शक्रइंद्रः लोकपालपदंचंद्रादिषुरूढं॥स्मृतिस्तुयोगमात्रेण
विर त्र री१

सं
नेषामेववेत्यर्थः।बहुवचनमनेकार्थः।द्वयोर्वर्म्यैक्यस्यापिवैयाद्यत्वात्‌।धर्मैक्यं।धर्मस्यैकत्वं।एकत्वं।एकोधर्मइतियावत्‌ सच
चमत्कारिबोध्यः।एवंचानेकप्रस्तुतमात्रसंबंधैकचमत्कारिधर्मानेकप्रस्तुतमात्रसंबंधैकचमत्कारिधर्मान्यतरत्वंल
क्षणंबोध्यं।मुखविकसितस्मितमित्यादावतिप्रसंगवारणायानेकेति।अत्रचमरवप्रेक्षितादिरूपानेकवर्ण्यसंबंधाने ण्य
कोधर्मइतितन्निरासः।दीपकवारणायमात्रेति।प्रस्तुताप्रस्तुतप्रसिद्धसाधारणस्याप्यन्यतरनिवेशः।त्वंगदितिप्रियांप्रतिद त्व
यितोक्तिः।नवांगस्यमार्दवसौकुमार्यदृष्टसतिकस्याचित्तमालत्यादीनांकठोरतांभासतेऽपितुसर्वस्येत्यर्थः।शशीविभातीति
ति।शशाश्चंद्रस्तस्यलेखाकला।गुणक्रियारूपेति।एतच्चतथाविधधर्मस्यप्रायशोगुणक्रियारूपत्वमित्यभिप्रेत्यो
क्तं।नतुलक्षणेतेनरूपेणधर्मस्यनिवेशः।गौरवात्‌ प्रयोजनाभावाच्च।यत्तुकैश्चिदेतन्नूयंयदूषणलालसैर्धर्मस्य
य गुणक्रियारूपत्वेनलक्षणेनिवेशइत्याशयमारोप्यासिहितंतदापाततः।शासतित्वयिहेराजन्नखंडावनिमंडलं।नम
नागपिनिश्चिंतेमंडलेशत्रुमित्रयोरित्यत्राभावरूपधर्मस्यैवान्वयादिति।तदिदमापाततोपिनमनोरमं।तथाहि
शासतीतिबहुदाहृतपद्येनिश्चिंतेनेतिनिश्चिंतपदः।शत्रुमित्रमंडलधर्मतयोपात्तःसचगुणस्वरूपएव।चिंता
भावावच्छेदस्यचिंतानतिरिक्तत्वात्‌ अन्यथाचिंताभावाभावस्याप्यतिरिक्तत्वापत्तेः।अथतत्रापिवैयात्यादिष्टाप जा

मा विस्रवः समृद्धिर्येषां नृपाः स्युस्ते निम्नाः तैर्नोः कुशस्य भावस्तत्तैर्निकाश्यं तेन शोभंत इत्यन्वयः शाणास्तु निकषः कष इत्य
मरः शाणोस्त्रिकोति। शाणारूपैकधर्मेत्यर्थः पूर्वोदाहरणाद्यादिदीपकमिहत्वंतदीपकमिति सिद्धः प्रस्तुताप्रस्तुतसाधा
रणधर्मस्य पूर्वप्रस्तुतेन्वयः दीपकपदवाच्यतायां बीजमाह प्रस्तुतैकत्यादि प्रस्तुते कविनिष्ठः प्रस्तुतैकपरः प्रस्तुता
न्वयविवक्षायोग्यं हितैत इतियावत् प्रथमं भवत्येनेतरकमपरोतीत्यनुषज्यते इतीतिवाध्याहार्यं। इतिदीपसादृश्यात्स
मानोधर्मो दीपकमुच्यत इति शेषः। यत्र धर्मस्य पूर्वं प्रस्तुतेन्वयः पश्चादन्यत्र यथोक्तोदाहरणयोस्तत्रैव तत्र प्रसंगोपका र
ध्वनकते रित्वमित्याशयेनय्यपीति। रूकवर्णेति। रूकवर्णमिव पुष्पं यस्या इति। विग्रहः त्रयः। गुणात्रयायात्यतमयुक्ताः शरस्थे
त्यादिः प्रत्येकं चकारो नैरपेक्ष्यद्योतकः कृतविद्यः प्रख्यातविद्यः। एतच्च प्रासंगिकं पथं यदा यत्र संसर्गे पूर्वं तत्तदातस्य ध्वज्य
प्रस्तुतत्वमितरयोस्त्वप्रस्तुतत्वमितिबोध्यं। युगपदिति तत्र यच्चिन्वेतीति तिच्चापि युगपदन्वय इत्यर्थः सेन्व
तीति बहुवचनांतस्य प्रस्तुतमात्रेणैकवचनांतेन पूर्वमन्वयायोगादिति भावः। किं तर्हि प्रयोजकं तत्राह। वस्तु
गत्येति प्रस्तुतोद्देशेन प्रस्तुतोद्देश्यकान्वयबोधेच्छया। प्रवृत्तस्यैवापदाभिहितस्यैव। वर्णनस्य कर्मत्वस्य च्या
अप्रस्तुता तद्विषयधर्मस्य तथा च चमत्कारीयैः प्रस्तुतान्वितस्वार्थबोधयत्वतीच्छायाश्चाश्रितपदाभिहितधर्मस्योभयत्र

२ - - - - - - - प्रासंगिकत्वं प्रसंगोपकारित्वं न हीयत इति। तथा च धर्मस्य पश्चादन्वयो न तत्र प्रयोजक इति भावः २

४अउद्देरप्तभेच्द४ रव्य १

न्वयश्चोद्देश्यतास्थेच्छाविषयतात्प्रस्तुत एवानत्वप्रस्तुते किंतु विशेषणतास्थविषयतैवेति तथा विधोद्देश्यताविरह एव प्रासंगि
कत्वबीजमित्याशयः एतदेवोपपादयति नदीति। प्रासंगिकत्वमिति दीपरूपयोरथ्यात्तिथिविषये प्रसंगोपकारित्वमित्य ति
र्थः तथा च तुल्यत्वमत तत्र प्रासंगिकत्वं न स्यादिति भावः। इदमुपलक्षणं जामातृविषये प्रासंगिकत्वापरिपि बोध्यं॥ एतदे
वतुल्ययोगितो भेदकमित्याह तुल्ययोगितायां त्विति। ननूद्देश्यत्वयोश्चमत्काराप्रयोजकत्वान्नालंकारभेदप्रयोजकत्वे
युक्तमित्यस्वरसादाह। अयं चेति अयं वक्ष्यमाणः अनयोर्दीपकयोगितयोः अत्र दीपके उपमानोपमेयभावः कैत्यो
त्व स्तु नेतावतापि तुल्ययोगितातोदीपकस्य पृथक्भावः स्थितः धर्मस्य सकृद्वृत्तिमूलायाविच्छित्तेरविशेषात् अन्यथा तुल्य
एव योगितायामपि धर्मिणा केवलप्रकृतत्वस्य चाविशेषस्यसत्वादलंकारद्वैतापत्तेः तस्मात्तुल्ययोगितायामेवत्रैविध्यमुत्यर्थः
स्यात् चितमिति भावः॥ ॥इत्यलंकारचंद्रिकायां दीपकप्रकरणं॥ ॥त्रिविधमिति। दीपकस्यावृत्तौ आवृत्तिदीपकं सवैतच्च
व त्रिविधमित्यर्थः। वर्षतीति शर्वरी रात्रिः वर्षेत्सर इवाचरतीत्यर्थः। कंदबेति कदंबकुसुमानि उन्मीलंतिविकसंति। कुटजोद्गमाः कटज
५४त कलिकाः स्फुटंतीति विकसंति। तद्गतादृष्ट्वा कामादीनि मत्ताः भवंति। शिखावाला मयूराश्च माद्यंतीत्यन्वयः। त्रैविध्यमुपपादयन्नेव व्या
चष्टे दीपकस्येति। क्रमेणेति। आद्यर्थे वर्षतीत्यै तिशब्दावृत्तिः अलंकारसंपादकत्वाच्चनकथितपदत्वदोषः द्वितीये विकासरूपस्या

७ इत्सनतरंगम्यइतिशेषः। तत्र तुल्ययोगितायां विशेषाग्रहणात् प्रस्तुताप्रस्तुतत्वरूपव्यवस्थापकाभावात्

३२

यमावृत्तिः उन्मीलंतीस्फुरंती।तिशब्दसंदेनतस्यैवबोधनात्।तृतीयेतुद्वयोरावृत्तिःस्फुरेद्वोत्कंठयतीति।मेघानांमालापंक्तिःकलापिनां
मयूराणांवर्गसमूहंउत्कंठयतीतिऊर्ध्वकंठंयस्यतादृशंकरोति।तथामकरध्वजःकामःयूनांतरुणानांमानसमुत्कंठ्यत्युत्कंठंकरोतीत्य
र्थसिद्देपिशब्दावृत्तिः।शमयतीति।जलधरस्यमेघस्यधारापंक्तिश्चातकरूणानांचिरकालिसुपिनतीप्राप्तांतृषंपिपासांशमयति।वधूजे
लोचनयोर्जलधाराअश्रुपंक्तिश्चकाभिनांप्रवसिद्भर्तॄकाणांक्षयपतीत्येकएवनाशनरूपार्थः।शब्दसिद्धोक्तइत्यर्थावृत्तिः।वदनेनेति।पार्थेसा
जलानांअत्रनिलीयतेशब्दस्यतदर्थस्यतिरोधानस्यचावृत्तिःननुप्रस्तुताप्रस्तुतार्थेसत्वदुपात्तस्यप्रसंगादप्रस्तुतोपकारित्वेदीपकोप
त्युक्तेनचावृत्तोनतत्संभवतीतिकथमावृत्तिदीपकमुक्तमित्याशंक्याह।एकेचेतिदीपकस्थानीयशब्दार्थयोरावृत्तौचेत्यर्थः।प्र
स्तुताप्रस्तुतेति।अंबुदमालादीनांविरहोद्दीपकतयाकेवलप्रस्तुतत्वात्।चेद्वीवेवारिविंदोश्चकेवलाप्रस्तुतत्वादितिभावः
दीपकच्छायेतिदीपकसादृश्येत्यर्थः।तत्रप्रस्तुतोपकारयोग्यत्वंवर्षतीत्यादौश्लेषवशेनास्तीतिभावः।मात्रपदेनदीपकात्पृथ
गेवायमलंकारोननुतत्रभेदइतिसूचितं।अतएवदंडिना।अर्थावृत्तिःपदावृत्तिरुभयावृत्तिरित्यपिदीपकस्थानमेवपृथकमलंकारत्र
यंयथेत्युक्त्वाविकसंतीत्युदाहृतंदीपकस्यानोपन्नेसहोभीतियावत्॥ ॥इत्यलंकारचंद्रिकायांआवृत्तिदीपकप्रकरणं।सक
धर्मोक्तिप्रसंगादसकृद्धर्मोक्तिगम्यवाक्यार्थसादृश्यकंप्रतिवस्तूपमालंकारंलक्षयति।वाक्ययोरिति।द्विवचनमनेकाभिप्रायं ३२
मालनुरोधादितिबोध्यं।एकसामान्येएकस्मिन्समानधर्मेसतितिसूरःसूर्यःलक्षणंयथाचेष्ठ।अत्रेतितुपमानोपमेभौतिभावप्रधा

२ स्थाना

विं३

प्रयुक्ते।संगतानीति।संगता निसंगमाः तांडितांविद्युतांविलसितानि।तल्लसितानिधनानिंयुथास्यात्तयाआर
ब्धानीतिसंगमपक्षे।घनेमेघेरारब्धानीचतांडितांविलसितपक्षेर्थः।काव्यादर्शोपनन्नामकदंडिकृतग्रंथेदर्शिता
तुल्ययोगितापदवाच्यत्वेननिर्दिष्टा।केचित्।।आलंकारिकाः।चक्रकः।चवहतेवतः।स्वातंत्र्यकपणलेनप्रसिद्ध
पुयुवामेवेति।इहभूलोके।बले।सैन्ये।अत्रचसैन्यजलयोःप्रसरणशीलत्वात्तत्सादृश्याद्विबप्रतिबिंबभावेनाभे
दमाश्रित्यधर्मैक्यंबोध्यं।मतांतरे।द्वितिवहुवचनेनबहुसंमततयादयुक्ततुल्ययोगितायांसर्वरसोध्वन्यते।सचदीपकं
तुल्ययोगितयोर्भेदकथनावसरेव्यक्तीभविष्यतीतिसंक्षेपः॥ ॥इतिश्रीमत्तत्सुपायेरस्यवैद्यनाथकृतायामलं
कारचंद्रिकायांस्याकुवलयानंदटीकायांतुल्ययोगिताप्रकरणं॥ ॥दीपकंलक्षयति।वदंतीति।वर्ण्यावर्ण्यानामिते
कत्वमेकारिधर्मोदीपकमित्यर्थः।उपमादिवारणायात्रापिपूर्ववल्लक्षणपरिष्कारोबोध्यः॥मानक्रियेति।क्रियारूपेकधर्म
न्वयइत्यर्थः।अत्रापिक्रियाविशेषणभूतयोर्मदप्रतापयोर्बिंबप्रतिबिंबभावोबोध्यः।यथावेति।शाणेनेनिकषपा
षाणेनोल्लीढउल्लिखितोमणिः।तथाहेति।समरयुधीनिहतः।क्षतक्षतसमरेसंग्रामेविजयशीलोयोधः।मदेनक्षीणोनागो
हस्ती।शरत्कालिशानाभिःशरकाणिपुलिनानिजलेनिर्मुक्ततटानियासांताः।सरितानद्यःकलामात्रेणशिष्टश्चंद्रः
स्मरतेमृदितांचुंबनालिंगनाद्युपमर्देम्लायितांबालानवयौवनावनिताःस्त्री।एवमर्थभूयाचकेषुगलितःसंक्रांता

शी

भामम्यास्या

भानुस्तथा। त्वंभ्राजसेस्फुवीत्यादिवाक्यार्थोपमायामतिव्याप्तिवारणाय गम्यमिति। अर्थादितिवारणायप्रस्कतप्रस्त
तेति। आननंमृगशावाक्ष्यावीक्ष्यलोलालकवृतं। भ्रमद्भ्रमरसंकीर्णंस्मरामिसरसीरुहमितिस्मरणालंकारेतिव्याप्तिवा
रणायवाक्यर्थेति। अत्र। हिद्विविधाभातिवाक्यार्थोपमायोगगनाधिकं शासाश्रयुभानुसदृशाः भूम्यधिकरणकशासाश्र
यत्वमितिप्रतीतिवन्नस्मर्यमाणताद्दशसरोरुहसदृशंतथाविधमाननमितिप्रतीतिर्येनवाक्यार्थो स्तिपेस्मरणात्। किंतुस्मरणासपक्ष
ताद्दशसरोरुहसदृशंताद्दशमाननमितिपदार्थगतोपमैवेतिद्वारणामितिदिक्। प्रस्कताप्रस्तुतत्वयोश्चसत्त्वेनिर्जीविरो
षाप्रयोजकत्वयानालंकारस्पृष्टप्रयोजकमित्यस्वरसादाह। अयंचेति। वक्ष्यमाणइत्यर्थः। विद्वानेवेति। यद्यथथवा
योथवछेदार्थेनैवकारेणा। विद्वान्जानातीतिपूर्ववाक्यार्थस्तस्यचनहिवैध्यस्तुत्तरवाक्यार्थः। सधर्मैवतथापिरूपवृ
त्त्येकाशइत्यादिप्रतीवारणायभावान्वयस्याथावश्यकतया विद्वानुजानातीतिवाक्यार्थस्यापिप्रतीतेस्तदपिप्रायेणवैधर्म्यो
दाहरणंबोध्यं। ननुवैधर्म्येणोपमेतिचाहतं। तस्याः साधर्मरूपत्वादितिचेत्सत्यं। वैधर्म्येणोपमैर्यन्यस्तेनहिवे
ध्यातिवाक्यार्थेनाक्षिप्तस्यापितुप्रसवित्रेवद्जानातीतिवाक्यार्थस्योपमानत्वेनविवक्षणात्। मुखतोवैधर्म्यप्रतीताव
पिसाधर्म्यएवपर्यवसानान्नदोषः। वैधर्म्येणेत्यस्यचवैधर्म्यद्वारेत्यर्थः। यदिसंतीति। एवकारोभिन्नक्रमः। स्वयमेववि
कसंतीप्रकाशंतइत्यर्थः। अत्रापिगुणाः स्वयंप्रकाशंतइतिभावेनान्वियविधर्माकस्तूरीकामोदः। शपथेननज्ञाय

का
त

यो
नुगाक
पी

मास्या
त

ना

x इतिप्रस्तुतार्थाक्षिप्तस्यसंगविशेषेण विनानपूज्यते x इतिव्यतिरेक पर्म्य
x स्यसजातीयान हिंतुंबीफलविकलोवीणादंडःप्रयातिप्र हिमानंपिस्याइ

र्म्यो

तइतिवाक्यार्थस्तदाक्षिप्तेनकिंतुस्वयमेवप्रकाशंतइतिवाक्यार्थेनचोर्थंगम्यमितिपूर्ववद्वैधर्म्योदाहरणत्वसंगतिः। यु
त्वत्रकेचिद्युक्तंविद्वानेवेतिपद्यस्यवस्तुनामकथंवैधर्म्यस्यादाहरणंयदिसंतीतितुनयुक्तं। वैधर्म्योदाहरणंहिप्रस्तुतधर्म
विशेषारूढदार्ढ्यायुक्ताक्षिप्तस्वव्यतिरेकसमानजातीयधर्म्यंतरारूढस्याप्रकृतार्थस्यकथने। यथौवंन्नासवोपिगुण
वानपिसंगविशेषेणपूज्यते। पुरुषः। नहितुंबीफलविकलोवीणादंडःप्रयातिमहिमानंमित्यादौ। अत्रसंहिगवि
शेषेणपूज्यतइतिप्रस्कृतार्थाक्षिप्तस्यसंगविशेषेणविनानपूज्यतइतिस्वव्यतिरेकस्यसजातीनाहितुंबीफलेवि यो
कलइत्यादौप्रकृतार्थानिबधइतिवैधर्म्योदाहरणत्वं। यदिसंतीत्यत्रतुस्वयंप्रकाशंतेतेनपरेणेत्यस्यप्रस्कृत
स्येवसजातीयोप्रकृतार्थः। शपथेननविभाव्यतेकिंतुस्वयमेवेतिप्रकृतार्थान्तरूपतयैवपर्यवसानादिति। तत्रेदं
बकुच्यं। वंशभवइत्यादिष्ववदुदाहृतयद्येपिकथंवैधर्म्योदाहरणत्वं। नहीत्यादेस्तुंबीफलविकलोमहिमानंनप्रयात्य
पितुदध्युक्तइतिप्रकृतार्थान्तरूपतयैवपर्यवसानादिति। किंबहुनासर्वत्रैववैधर्म्योदाहरणेसाधर्म्यपर्यवसानंविना र्म्य
नोपमानिर्वाहइतितदुक्तंदप्रसंगः। अथापातप्रतिपन्नेनाप्रकृतवाक्यार्थेवैधर्म्येतदुदाहरणत्वंतहिप्रकृतेपितद र्म्या
स्तीतितुल्यंयदपिप्रस्कृतेत्यादिवैधर्म्योदाहरणत्वनिवर्चने। तदयुक्तं। प्रियेः परेषांविरारुतामकरस्थात्य

र

१ अत्र तृतीयपंक्तौ धर्मयोरित्यारभ्य कौ न त्रिंशत् अक्षरोधपत्राणि

॥२४॥ वतोराशिं तांहि पांसवइति वैधर्म्यदृष्टांतत्वापनात् नत्वप्रस्तुतवाक्यार्थः स्वव्यतिरेकमाक्षिपति किंतु प्रकृतवाक्यार्थ
एवेति दिक्॥ ॥सव्यलंकारचंद्रिकायां प्रतिवस्तूपमाप्रकरणं॥१७ ॥दृष्टांतलंकारलक्षयति। चेदिति वाक्ययोरित्यनुवर्तते
च्य धर्मयोरिति अध्याहार्यं। तद्दितितेद्व्यर्थकं। अर्थतोव्योरथष्यंत्रेति यत्र काव्ये तयाचोपमानोपमेयवाक्यार्थयोः
सहप्रस्तुतविशेषरूपस्यचवाक्यार्थस्यन्यसमूनमर्थांतरन्यासइत्युक्तंभवति। तत्राद्यः स्याद्वितीयार्धमुदाहरणं। द्वितीयस्य
द्वितीयः श्लोकः। नन्वयंवाक्यलिंगान्नातिरिच्यते। तथाहि उदाहरणद्वये यथा प्रस्तुतयोः सामान्यविशेषयोरुक्तिः प्रस्तुतयो
विशेषसामान्ययोः कथमुपकरोतीति विवक्ष्यं नहि सर्वथैवाप्रस्तुतानन्वय्यप्रस्तुताभिधानं युज्यते। नतावदप्रस्तुतप्रशंसा
याभिवप्रस्तुतव्यंजकतया। प्रस्तुतयोरपि सामान्यविशेषयोः स्वशब्दोपात्तत्वात्। नाप्यनुमालंकारइवप्रस्तुतप्रतीति
जनकतयातद्धि हि व्याप्तिपक्षताधर्मताद्यभावात्। नापि दृष्टांतालंकारइवोपमानतया विस्रब्धघातदोषः स्वव धायखल
स्यवीरकोपकारः। वनतरुभंगध्वनिरवहि निद्रातस्कारः करिणइत्यादिषु सामान्यस्योपमानत्वदर्शनेपि विशेषसा
मान्यस्यकचिदपि तदर्शनादुपमानतयान्वयेसामंजस्याप्रतीतेश्च। तस्मात्प्रस्तुतसमर्थकतयैवाप्रस्तुतस्योपयोगइति
हापिवक्तव्यं एततश्चवाक्यार्थहेतुकं काव्यलिंगमेवात्रापि स्यान्नत्वालंकारांतरस्यावकाशइति चेत् अत्रकेचित् समर्थनसा व
पेक्षस्यार्थस्यसमर्थने काव्यलिंगं निरपेक्षस्यापि प्रतीतसावभवतसमर्थनेऽर्थांतरन्यासः। नहियत्वन्नेत्रसमानकांतिसलिल

पोर२

नेऽउपमानोपमेयभावपरयोरित्यर्थः पृथगिति भिन्नशब्देनेत्यर्थः। अयमेवचवस्तुप्रतिवस्तुभावइत्युच्यते। स्थिरेति। शैलीस
रै दृत्तेरत्नमवदीर्णोन्नदीपः। अत्रपूर्वार्धमुपमेयवाक्यं उत्तरार्धमुपमानवाक्यं नश्यत्वनाशाभावरूपः समानधर्मः शब्दभे
देनोपात्तः सामान्याभावमात्रबोधकस्यापि बाधतेरत्ननाशरूपविशेषपरत्वात्। अयमेवचपूर्वोदाहरणोक्तिदः। त्वविति। ईश्वरप्र
तिपत्तिस्योक्तिः। अमृतप्रस्रवणशीलिनवपादपंकजेनिवेशितआत्माश्रितः करणं येन तादृशो भक्तः अन्यदमृतातिरिक्तं फलं
कथमिच्छति नकथमपीत्यर्थः। अमृतं चात्र ब्रह्मानंदरूपं हि निश्चितं मधुव्रतोभ्रमरः मकरंदेनरसेन निर्भरयत्ने रविंदस्थि
तेसतिइक्षुरसंनवीक्षतइत्युपमानवाक्यं इक्षुरकंतालमखाणेति प्रसिद्धोषधीपुष्पो अवर्जनीयस्येति। अनिष्टेपिस्वसा
मग्रीवशाज्जायमानस्येत्यर्थः। इच्छापूर्वकेति। तथाचवीक्षतेरिच्छापूर्वकवीक्षणेतिभावः। इच्छापर्यवसितइति। सविशेषणे लक्षणे
हीतिन्यायादितिभावः। ननुमीलति कंदेवानीतिपूर्वोदाहृतायामथोवृत्तं वतिथाधिमाशंक्याह। अर्थावृत्तिरित्यादि। शब्दा
वृत्तौतु धर्मस्यैकेनैव शब्देनावृत्त्या बोधनान्न भिन्नशब्दबोध्यत्वमिति नातिव्याप्तिरतोऽर्थावृत्तिपर्यंतानुधावनं। एवंच
भिन्नशब्दबोध्येकधर्मगम्यं प्रस्तुताप्रस्तुतवाक्यार्थसादृश्यं प्रतिवस्तूपमेति लक्षणे बोध्यं। दृष्टांतालंकारेतिव्याप्ति
वारणाय भिन्नशब्दबोध्येति। तत्रतु बिंबप्रतिबिंबभावापन्नधर्मगम्यं सादृश्यमिति नातिव्याप्तिः। द्विविधमिति यथा

अलं॰ चं॰ दन्यतरमात्रविषयेत्यर्थः॥ यद्यप्यत्रात्मनेपदपरस्मैपदभेदेन पदक्लेदात्रपदार्थतिरेकोचितातथापि पाठपरिवर्त्तनेन
पदाभेदेपि नपदावृत्तेरयं विषय इति बोधयितुमेतदुक्तं॥ अयं दृष्टांतः कृतश्चेति॥ न पंप्रतिमेत्रिणउक्तिः॥ हेराज
न्त्वयामनोगर्व्याभिमुखं नतु गर्वितं कृतं च॥ किमन्यदपेक्षितमितिशेषः॥ एवं शास्त्रप्रयोगादिकं विना नोऽस्मा
कं द्विषः शत्रवो निहताश्च नतु निहनिष्यंते॥ अंशुमानस्तं यो यावदुदयाद्रेर्मौलिंतावद्गिरोऽलंकारत्तो नायाति तावद्
यतमांसि तिष्ठंति तस्मिंस्तु तथात्वे ते न तिष्ठंतीतिदृष्टांतः॥ अत्रमनोगर्वाभिमुखीकरणवैरिहननयोरंशुमदु ३
दयाचलमस्तकागमनतमःस्थित्यभावयोश्च यथाक्रममेवे धर्म्येण बिंबप्रतिबिंबभावः॥ इत्यलंकारचंद्रिकायां दृ
ष्टांतालंकारप्रकरणं॥ १८॥ निदर्शनां लक्षयति॥ वाक्यार्थयोरिति सदृशवाक्यार्थसंबंधीयदैक्यारोपः॥ उपमेय
वाक्यार्थेउपमानवाक्यार्थाभेदारोप इति यावत्॥ यद्दातुरिति॥ दातुः सौम्यतेतियत्तद् इति सामान्ये नपुंसकं॥ सेय
मिति विधेयाभिप्रायकं स्त्रीलिंगं॥ यत्तच्छ्रोमिति॥ यद्यपि मुखचंद्र इति यत्र दातुः सौम्यता पूर्णेदोरकलंकतेत्येता
वताप्यैक्यारोपः संभवति तथापि यत्तच्छब्दाभ्यां स्फुटतया तद्वगमात्तदुपन्यासः॥ अरण्येति॥ अबुधो मूर्खो जनः
सेवितो यद्दितिगुणीकृतस्सेवनक्रियापरामर्शः उत्तरवाक्यगतेन यच्छब्देन तच्छब्दाक्षेपात्कृतं तु अरण्यरुदितं कृतमित्या
द्यन्वयः॥ उद्वर्तनं यवगोधूमादिचूर्णेन मलापकर्षणं॥ स्थले निर्जले प्रदेशेऽब्जं जलजं॥ ऊषरे अंकुरायोग्य क्षारभूमा
गे॥ श्वनः पुच्छं श्वपुच्छं अवनामितं ऋजुतां संपादनाय नम्रीकृतं॥ बधिरस्य कर्णे जपएव जापः प्रलाप इत्यर्थः॥ अंध

हत्वनेकेषामि २ न

स्यमुखे तत्स्वं मुखं दर्पणो धृत इत्येवं निरर्थकत्वेन सदृशानामनेकेषां वाक्यार्थानामबुधजनसेवनरूपप्रकृतवाक्यार्थेऐक्यारोपः पूर्ववैतत्त्वे ते
कस्यैवैक्यारोप इति विशेषः॥ निदर्शनांतरमाह॥ पदार्थेति॥ पदार्थवृत्तिः पदार्थसंबंधिनी॰ एके॰ आलंकारिकाः॰ अन्ये॰ पूर्वोक्तवि
लक्षणां॰ त्वन्नेत्रेति॰ ली ला शोभा॰ नीलो बुजन्म मोः नीलोत्पलयोः॰ वियोग इति गौडदेशगतानां नारीणां वियोगस्वकांतवियोगकालेयो ये
गंडतले पांडिमा पांडुवर्णो भवति सः खर्जूरीणां लतानां मंजरीगर्भरेणुपुंजेष्वदृश्यत दृष्ट इत्यन्वयः उपमाने॰ यथोक्तरेणुरूपे उपमे
उपमानधर्मारोपएवपदार्थनिदर्शनायोः प्राचीनैरुदाहरणात्कथमियं पदार्थनिदर्शनाव्यतइतिशंकायामाह उभयत्रेति उपमेये उपमानध
र्मारोपे॰ उपमाने उपमेयधर्मारोपे चेत्यर्थः तथाचौपम्यपर्यवसायित्वस्यैव पदार्थनिदर्शनाजीवातुत्वेनारोपविषयस्योपमेयत्वेन निवेशे प्रयोज
नाभावादिहापि सायुक्तैवेति भावः नन्वेवमुक्तिर्वाक्यार्थनिदर्शनालक्षणस्यात्रातिव्याप्तिरित्याशंकाशयवानाह॰ मय्यपीति॰ वियोगका
तथापीति लीनगौडनारीगंडतलपांडिम्नः खर्जूरीगर्भरेणुदृष्टपांडिम्नश्च यत्तच्छ्यामैक्यारोपसत्वादिति भावः अथ विशेषविवक्षायातिव्याप्तिपरि
हरन्नेव स्वाभिमतनिदर्शनाद्वयविभागं दर्शयति॰ विशिष्टयोः बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोः॰ एवं च वाक्यार्थशब्देन तादृशा विवक्ष
णाद्वियोग इत्याद्युदाहरणे नातिव्याप्तिरिति भावः उपमानेत्यादि एतच्चास्य रूपकध्वनेनत्वे स्वरूपेण लक्षणे निवेशः तादृप्यरूपकातिव्याप्ति
त्मे वारणायोपमाकल्पकत्वस्यारोपविशेषणस्यावश्यकत्वेन उपमाकल्पकत्वत्र तदन्यधर्मारोप इत्येतावत एव लक्षणस्य निर्दुष्टत्वात्
तदुक्तं अभवन्वस्तुसंबंध उपमापरिकल्पक इति॰ ताद्रूप्यरूपके तु तादृप्यावच्छिन्नाभेद एव विवक्षितो न पुनरुपमेति तदुदाहरणम्॰ न
नु वयिस तीत्याद्युदाहरणे कापि निदर्शनानस्यात् अन्यधर्मस्यान्यत्र नारोपात् एकवाक्यत्वेन वाक्यार्थभेदाभावाच्च पदार्थवाक्या
र्थनिदर्शनयोरसंभवादित्याशंक्याह एवं चेति उक्तव्यवस्थाश्रयणे चेत्यर्थः विशिष्टयोरिति बिंबप्रतिबिंबभावापन्नस्तु वि च

न्य

२

अलं॰ चंद्रि॰ श्लिष्टयोरित्यर्थः॥ तत्र तावत्पूर्णोपमेयो स्मिव अस्मदस्यार्थितानां दानरित्यधिसति इतरं क्षुद्रप्रभुमनुसरं तोऽर्थिनां मुद्रा
चिन्हं दर्शयितो वयं कामधेनोस्थितायां दुग्धुकामाः श्वरमयोः वाञ्छात्वयोः श्वरणयोः चीते दुग्ध ग्रहं दुःखेन ग्राह्यं श्वरसमुद्
त्रिरुमनुसराम इत्यर्थः के सकलकामदमहेश्वरकालीनक्षुद्रधनिकानुसरणं कर्तुं कामधेनुस्थितिकालीनतथा क
कर विधेयानुसरणकर्तृश्वेन्यारोपः॥ तत्रोपमानुकोटिविशेषणयोः कामधेनुकरभयो रूपमेयकोटिविशेषणयोश्च
मं महेश्वरक्षुद्रधनिकयोर्यथाक्रमं बिंबप्रतिबिंबभावो बोध्यः एवमनुसरणयोरपि एवं दौर्थ्यामित्यत्रापि अधिगुणपरस्मृहयोर्बिंबप्र
रूवास्या तिबिंबभावो बोध्यः नन्वियं व्यवस्था नरउविरुद्धत्या शंक्योर्थयोरिति॰ ननु वाक्यार्थे शब्दस्यार्थान्तरवाच्यार्थसाधारणेन
कपदार्थपरत्वेन वोद्रोदाहरणसंगरसंभवादेव विधघटत वाक्यार्थपरत्वं न युक्तमित्यत आह॰ एवं चेति॰ एवं विधार्थविलक्षणे चेत्य
र्थः अवलेहने॰ जिह्वया चहने॰ पंचाननः सिंहः रत्नस्य परिष्वंग आलिंगने॰ व्यालीभुजंगी॰ अत्रास्यलं॰ चलवदनिष्टजनकत्वं च
साधारणो धर्मः प्रस्तुतवृत्तांतो राजसेवा॰ निकृष्टनायाः तत्लक्षणस्य नक्षतिः नंश्यातिः॰ तयोः॰ प्रस्तुताप्रस्तुतवृत्तांतयोः॰ ति
असिधारादिभिः समरत्वो बिंबप्रतिबिंबभावात् द्विशिष्टयोस्त्वैक्यारोपादिति भावः एवं तर्हि सदृशयोरैक्यारोपइत्युपलक्षणं
मस्विस्याशंक्याह॰ एतच्चेति॰ एतावता विशेषणविवक्षणादेवेत्यर्थः भेदो व्यावृत्तिः तथा च तदभावे रूपकेतिप्रसंगस्यादिति
भावः कथमनेन तद्वारणं तत्राह रूपके हीति॰ अविशिष्टयोः॰ बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टयोः॰ बिंबप्रतिबिंबभावापन्ने वस्तु
न्यारत्तिं दर्शयति अंघ्रिद्वंद्व इत्यादि॰ बलेर्दैत्यविशेषस्य शोधनेन धनेन कर्णस्य कुर्वे मुष्टिस्तो हरे रंघ्रिद्वंद्वो बोधु प्राकं मुदे॰ श्लिष्टि

२४ धर्मयोर्बिंबप्रतिबिंबभावो दृष्टांतवृत्तिलक्षणं काममिति॥ अनेन। प्रकृतराजविशेषेण॥ राजन्वती
मंत्रिमत्त राजवती॥ राजन्वान् सौराज्ये इति निपातः॥ नक्षत्राण्यश्विन्यादीनि सप्तविंशतिः तारा स्वातितराः गोवली
वर्दन्या याता॥ ग्रहा भौमादयः संकुला व्याप्ता॥ ज्योतिष्मतीति प्राशस्त्ये मतुप्॥ अत्र राजन्वती ज्योतिष्मत्योस्तयो
बिंबप्रतिबिंबभावः पूर्वोदाहरणे कीर्तिकांत्योर्बिंबप्रतिबिंबभावप्रयोजकमनोहारित्वरूपसादृश्यमार्थं॥ इहतु
राजज्योतिषोः प्राशस्त्यरूपं तच्छाब्दमिति भेदः॥ देवीमिति॥ देवीं वाचं सरस्वतीं ब्रह्मवउपासते हि सर्वं तत्त्वं॥ हिश
ब्दस्येवकारार्थत्वात्॥ तु परं सरस्वतीसंबंधि सारं असौ प्रसिद्धः गुरुकुले क्लिष्टः॥ अध्ययनश्रमवान् मुरारिना
माकविर्नितरामतिशयेन जानीते॥ अत्र दृष्टांतमाह॥ वानरक्षपर्वर्गे यो ब्धिः सिरब्धिर्लंघितएव किंतु अस्याब्धेर्गं
भीरतां पातालपर्यंतनिमग्नापीवरास्तूलातनुर्यस्ते वेविपतो मंथाचलः मंदराद्रिरेव जानातीति॥ दृष्टांतोदाहरण
शब्द व्यासंगतिमात्रां कते॥ नन्विति॥ वाक्ययोरिति सप्तमी॥ एके धर्मे इत्यनंतरं शब्दभेदेन निर्दिष्ट इति शेषः॥ सागरे
त्यादि॥ सागरस्याब्धस्तनोयो॰ वधिरितिगंभीरतापदार्थकथनं॥ संस्पर्शस्तलक्षणया जानात्यर्थ इति बोध्यं॥
तथा च धर्मस्येदान्न प्रतिवस्तूपमा॥ किंतु सारस्य तत्सारज्ञातं॥ सागराधस्तनावधिसंस्पर्शयोर्बिंबप्रतिबिंबभावात्
दृष्टांतालंकार एवेत्याशयः॥ वर्षस्वंबुदमालेयं वर्षत्येषा च शार्वरीतिवत्सदावृत्तिदीपकस्यादिसाशंक्य समाधत्ते अत्रे
तिपूर्ववत्॥ अर्थावृत्तिप्रतिवस्तूपमयोरिव॥ प्रस्तुताप्रस्तुतेति दृष्टांते॰ प्रस्तुताप्रस्तुतविषयः पदावृत्तिस्तत

२

अलं·चंद्रि·

एकपदार्थे अपरपदार्थे तद्धर्मान्यतरारोपइति तल्लक्षणस्य तद्भिन्नत्वादिति भावः॥ निदर्शनांतरमाह॥ अपरामिति॥ पूर्वविलक्षणामि
त्यर्थः॥ निदर्शनामित्यनुषज्यते॥ क्रियया सत्सदर्थयोर्बोधनमपरं निदर्शनं प्राकृतिति संबंधः सदसदर्थयोरिति वक्तव्येऽपि छंदो
नुरोधादित्यमभिधानं॥ समुद्रपात्राल् घ इत्यादिसोऽत्र निर्देशे न पूर्वनिपातेऽविधेरनित्यत्वज्ञापनात्॥ लक्षणं व्याचष्टे॥ कस्यचिदिति॥ हे
अत्रासतः सतो वेति विभागकथनं न तु लक्षणांतर्गतं॥ उदासीनार्थबोधने चमत्कारित्वाभावेनेयानतिप्रसंगात्॥ स्वक्रियया सह कोऽपि
भूतया क्रियाविशिष्टस्य वस्तुनः संबंधिअर्थस्य बोधनं बोधानुकूलो व्यापारो यन्निबध्यते सा निदर्शनेति लक्षणं॥ अयं निवातपद्मोदर वर्ण्यते
सोदरः स्थितो विलोचनाभ्याम् अवलोकयंती॥ नकेवलं यूनि मनोभवेऽपि व्यनक्ति कंचित्तपसः प्रभावमित्यादावतिव्याप्तिः अवलोकैक्रि न
याविशिष्टया कामिन्याः तपःप्रभावबोधनस्य वर्णनादिति चेन्न॥ क्रिययेत्यनेन दृष्टांतविधया बोधनस्य विवक्षितत्वात्॥ उक्तोदाहरणे च
लिंगविधया बोधकत्वेन तदभावात्॥ इत्थं च दृष्टांततया क्रियाविशिष्टस्यार्थबोधकत्वं वर्ण्यमानं निदर्शनेति पर्यवसितं॥ ननु यदि
त्वत्र बोधनस्यावर्णनात् कथमुदाहरणत्वमत आह॥ तत्रेति॥ उदाहरण इत्यर्थः॥ लक्ष्ये लक्षणं संगमयति तत्रैवेति॥ बोधनस्य
गम्यमानत्वादित्यर्थः॥ दृष्टांतभूतयेति॥ दृष्टांते स्वस्मिन् भूतया विद्यमानयेत्यर्थः॥ दृष्टांतोभूतः संजातोऽयं वेति वा॥ एवं॥ तेम
वत्॥ चंद्रस्यापि राजत्वं सोमोऽस्माकं ब्राह्मणानां राजेत्यादिश्रुतिप्रसिद्धं॥ अनिष्टपर्यवसायिनमर्थं॥ नाशरूपानिष्टसाधनं राजविरु
द्धाचरणरूपमर्थं॥ उन्नतमिति॥ योऽल्पघुरल्पबुद्धिरल्पपरिमाणश्च सः उन्नतं पदं उत्कर्षं उच्चस्थानं चावाप्य हेलयैव पतेदिति ब्रुवन् कथय
न्निव शैलशेखरगतो गिरिमस्तकवर्ती दृषत्कणः जलबिंदुसमूहश्च आरुणमंदेनापि मारुतेन धुतः कंपितः अधः पतति उत्कर्षाधीयतेऽ
पोऽवश्यं पततीत्यर्थः॥ ध्रुवमिति पाठे बोधनस्य पूर्ववद्गम्यमानत्वादप्रयोगः॥ दृषत्कणइति पाठे पाषाणकण इत्यर्थः॥ रूपेति॥ य उदयावलंबा

य

गतं देवं सर्वचूडामणेः पदे स्थाने मस्तके धत्ते धारयति॥ किंकुर्वन् गृहमेधिनः गृहस्थान् सतामातिथेयी कार्येति बोधयन्॥ आतिथे
यी आतिथ्यं॥ अत्र उक्तनिदर्शनात्रैविध्ये॥ केचिदित्यस्येति व्यवहरंतीत्यनेनान्वयः॥ धर्मिणोर्धर्मयोः साम्यमात्रेण चमत्कारनिष्पत्तेस्त
त्कृतबिंबप्रतिबिंबभावेन धर्मिणोः साम्यावगतिरिति भावः॥ गाम्भ्करोतीति॥ स्वविशेषणत्वेन स्वीकरोतीत्यर्थः॥ दृष्टांततया बो
धनस्यैव तत्र विवक्षितत्वात् इतरदेवोपपादयति बोधयन्नित्यादिना करीषं शुष्कगोमयं तस्यायं कारीषः समर्थाचरणे समर्थकरणे
सामर्थ्यात् सादन इति यावत्॥ भावप्राधान्यात्॥ उपमानभावेन॥ दृष्टांतत्वेन॥ एवं प्रदर्शिते निदर्शनात्रये निदर्शनापदप्रवृत्तिनिमित्तस्यै
कस्याभावान्नार्थ एव निदर्शनाशब्द इति बोध्यं॥ ॥इत्यलंकारचंद्रिकायां निदर्शनाप्रकरणं॥ ४२॥ व्यतिरेकं लक्षयति॥ व्यतिरेक
इति॥ विशेषो वैलक्षण्यं॥ उपमेयस्याधिक्यं उत्कर्षः पल्लवत इति॥ पंचम्यर्थे तसिल्॥ कल्पतरोः पल्लवतः पल्लवादपि वक्ष्यमाण
स्तितव करस्य विशेष इति संबंधः एकः पल्लवः परो हस्तः कर्णेरत्नधेयं तिरस्कुरुते दानातिशयेनेति भावः॥ अत्रोपमेयस्य करस्योत्कर्षः
पूर्वोदाहरणे न्यूनत्वेनोपमेयं ज्ञाव्यं॥ इह तु स्तकलकोमलत्वादिप्रयुक्तं तदगम्यमिति भेदः॥ तन्न्यूनत्वेति॥ उपमेयन्यूनत्वेत्यर्थः॥ रक्तस्त्वमि
ति॥ अशोकतरुं प्रति विरहिणः कस्यचिदुक्तिः॥ हे अशोक आवयोः सर्वं तुल्यं समानं अहं केवलं धात्रा विधात्रा सशोकः शोकसहितः कृतः
त्वं तु शोकरहित इत्यशोकपदश्लेषाद्गम्यते॥ किं तत्सर्वं समानं तत्राह॥ रक्त इत्यादि॥ त्वं नूतनैः पल्लवैः रक्तः रक्तवर्णः अहमपि प्रियायाः
श्लाघनैर्गुणैः सौंदर्यादिभिः रक्तोऽनुरक्तः॥ अर्थात् प्रियायां हे सखे॥ त्वां प्रति शिलीमुखाभ्रमरा आयांति मां प्रत्यपि स्मरेण धनुषा मुक्ताः प्रे
रिताः शिलीमुखाः बाणा आयांति॥ एवं कांतायाः पादतलस्याघातो यथा तव मुदे संतोषाय तद्वत् तथा ममापि संतोषायेत्यर्थः॥ कामिनीपादाघा
तेनाशोकस्य पुष्पोद्गम इति कविप्रसिद्धिः॥ अत्रोपमेयस्य सशोकत्वेनापकर्षः॥ अनुत्कर्षपर्यवसायी॥ उपमेयोत्कर्षापकर्षान्यतरपर्यवसा
नरहितः॥ इदमेवेति॥ कूपलस्य कृपाणस्य खड्गस्य च आकारतः दीर्घोऽवर्णोत् आरूढस्य केवलं सेदो वैलक्षण्यं प्रकारांतरेण तु साम्यमेव

८

अलं. चंद्रि.

स्यर्थः॥कथंतत्राह॥दृढतरेत्यादि॥दृढतरं निबद्धो मुष्टिर्येनेति कृपणपक्षे॥यत्नव्ययेमुख्ये न मुष्टिर्मोचनाभावात् खड्गपक्षे तु दृढतरं निब
द्धः संबद्धो मुष्टिर्मुष्टिग्राह्यभागो यस्येत्यर्थः॥कोशो भांडागारगृहं तत्र निषण्ण उपविष्टः कृपणः कोशो विधानके निषण्णः स्थित इति खड्गप
क्षे॥सहजमलिनः स्वभावमलिनः मलिनवेषत्वात्कृपणः खड्गस्तु कृष्णवर्णत्वादिति॥एवं च किंचिद्धर्मप्रयुक्तसाम्यवत्तया प्रतीयमानयोः
किंचिद्धर्मप्रयुक्तवैलक्षण्यं व्यतिरेकशरीरं॥वैलक्षण्यं तु क्वचिदुपमेयस्योत्कर्षे क्वचित्तदपकर्षे पर्यवसानं॥क्वचित्तु तदन्यतरपर्य
वसानविरहेऽपि स्वरूपवैचित्र्यमात्रविश्रांतमिति बोध्यं॥एतेन चरमभेदद्वयतदुदाहरणदूषणं कस्यचिदापातरमणीयमिव भासमानं प्रत्यु
क्तं वेदितव्यं॥अत्यंतासारतया तु नानुवादमर्हतीत्युपरम्यते॥इत्यलंकारचंद्रिकायां व्यतिरेकप्रकरणं॥१०॥सहोक्तिरिति॥लक्ष्यनिर्देशः
सहभावइत्यादिलक्षणं सहभावः साहित्यं जनरंजनः॥सहृदयजनाह्लादकः एवं च चमत्कृतिजनकं साहित्यं सहोक्तिरिति लक्षणं॥दिगंतमिति॥
वस्तुतस्तु कीर्तिः प्रत्यर्थिक्ष्माभुजः शत्रुभिः सह दिगंतमगमदित्यन्वयः॥अत्र कर्त्री यावानिरूपितत्वार्थकतया॥प्रत्यर्थिनिरूपितसाहित्यवती की
र्तिर्गमनाश्रय इति बोधे एकधर्मान्वयित्वरूपसाहित्यवत्त्वात्प्रत्यर्थिनामपि गमनान्वयप्रतीतिः॥तदुक्तं॥सा सहोक्तिः सहार्थस्य बलादेकं द्वि
वाचकमिति॥छायेति॥ग्रीष्मर्त्तौ मध्याह्नवर्णनमिदं॥छाया पांथैः स्वगेः समं सार्धं विटपिनां तरूणां तलं च तलप्रदेशं संसज्यते॥कुतइत्यत
आकांक्षायामुत्प्रेक्ष्यते॥श्रांतैवेति॥श्रमश्चात्रातपातिशयकृतो बोध्यः॥एवमग्रेऽपि॥जडताशीतलता ग्लानेव सरोजलस्य मूलमधोदेशं मीनै
र्मत्स्यैः सह याति गच्छति॥ग्लानिर्बलापचयः॥तथा अहिमांशुच्छायांशुभिः करा यस्यैवंभूतस्य रवेर्दीधितिरलं निवसंत्येव संतीलोकेः समभ्य
चः जलानि आचामति पिबति॥दीधितिः स्त्रियामित्यमरः॥निद्राकुलितेव सती कांताननैः सह गर्भगृहमाश्रयं तरगृहं प्रविशतीति तत्रैव तद्द्वया
ति त कुंतिस्त्रोहानिः सौकुमार्यात्स्वयेन तत्सौलुभ्याकांक्षोपादानं॥इत्यादावपीति॥इंदुमती स्वयंवरे रघुवंशे अजेन सार्धं विहरत्वर्षशोभतीरे
पुत्रालीवनममरेषु॥दीपातरानीत इवं गमुख्य पाकुत खदलवामरुद्धिरिति पद्यं॥अत्र सहोक्तिरेवमलंकारिता अलंकार इत्यर्थः॥॥इत्य
लंकारचंद्रिकायां सहोक्तिप्रकरणं॥११॥विनोक्तिरिति॥किंचिद्विना प्रस्तुतं वर्ण्यं हीनं दुष्टमुच्यते चेत्तदा विनोक्तिर्नामालंकार इत्यर्थः॥विद्येति॥ श्री
विनयसंपत्तिं विना या विद्या सा हृद्या मनोहरापि दुष्टेत्यन्वयः॥अत्र प्रस्तुता या विद्या या विनयं विना दुष्टत्वमुक्तं॥यश्चेति॥यः पुरुषस्य

संबंधः कीदृशः विधेर्ब्रह्मणो विष्टरआसनं तद्रूपस्य पद्मस्य नालदंड इत्यर्थः॥विशिष्टरूपकेति॥उर्ध्वोत्क्षिप्तत्वविशिष्टं ब्रह्मदंडविधिवि
ष्टरसंबंधित्वविशिष्टनालदंडसंबंधिरूपकेत्यर्थः॥विशेषणेति॥उर्ध्वोत्क्षिप्तत्वरूपोपमेयविशेषणविधिविष्टरपद्मसंबंधित्वरूपो
पमानविशेषणयोरित्यर्थः एवकारसूचितबिंबप्रतिबिंबभावव्यतिरेकं स्फुटयति यद्वा तु इति॥अभावादिति॥सादृश्याभावा
दितिभावः रूपके बिंबप्रतिबिंबाव्याप्तिमाशंक्य परिहरति यत्रेत्यादिना॥यत्रेति यस्य इति सावयवरूपकोदाहरणे इत्यग्रेतनेनान्वयः
विषयविषयिविशेषणानां॥आरोपविषयारोप्यमाणसंबंधिनां विशेषणानां॥ज्योत्स्नेति॥इयं रात्रिरेव कापालिकी दृष्टा पातुइ
पातरंस्त्रमतीत्यन्वयः एतत्प्रधानरूपकं॥एतदंगरूपतान्यपराणि विशेषणैः प्रतिपाद्यते॥यथा॥ज्योत्स्नारूपेण भस्मना छुरण
मंगलेपस्तेन धवला॥तारकारूपाण्यस्थीनि बिभ्रती॥अंतर्धानस्य व्यसने कौतुके रसिका॥चंद्ररूपे मुद्राकपाले न्यस्तेनांजन
नस्य छलेन सिद्धांजनस्य परिमले चूर्णं दधती धारयंती दीक्षाकालगृहीतोपकरणेषु मुद्रापदनाम्ना पारखंडानां व्यवहार इति चे
दृ उदासः॥मुद्रापरिमलशब्दौ प्रशंसार्थावित्यन्ये॥मुद्राविहृतं पेकपाल इति वार्थः॥विषयविषयिणोः रात्रिकापालिक्योः नाद्विशेष
णानां॥तत्संबंधिनां ज्योत्स्नाभस्मादीनां॥यथाश्रुते रात्रिकापालिकीति समासस्योत्तरपदार्थप्रधानतया ज्योत्स्नादीनां रात्रिविशेष
णत्वाभावादसंगतेः प्रत्येकमेवेति॥रूपस्वरूपेणैवेत्यर्थः॥नन्विति॥उक्तयुक्त्या विशेषणत्वाभावादितिभावः॥वस्तुतोऽसस्मादेः
कापालिकीं प्रत्यपि न विशेषणत्वमपि तु तत्कोटिनिविष्टत्वमेवेत्यपि बोध्यं॥वाक्यार्थशब्दस्य बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टधर्मपर
त्वमंगीकृत्य राजहंसेवेत्युदाहरणे वाक्यार्थरूपेति निर्दिशेनाबउक्तमुपसंहरति तस्मादिति॥उक्तलक्षणस्य व्यवस्थितत्वादित्यर्थः॥मतांतरेति
ति॥सदृशयोर्वाक्यार्थयोरैक्यारोप इति यथाश्रुतलक्षणं नीकर्तमत इत्यर्थः॥इह राजहंसेवेत्युदाहरणे॥पदार्थरूपेवेति॥उपमाकल्पक

५

प्रतिपादनात् वचनात्॥ लक्ष्येलक्षणंसंगमयति। अत्रेति। आरंभः आदिभागः साधारणात्। श्लिष्टत्वात्। यद्यपिचुंबतीत्यत्रनश्लेषस्तथाप्यर्थद्वयबोधकत्वमात्रेणतस्यसाधारण्यो
क्तिः उपस्कृतादितिसाधारण्यादित्यस्यविशेषणं। तत्रचंद्रमाःशब्दगतेनपुल्लिंगेननायकत्वाभिव्यक्त्याउपस्कारः। ऐंद्रीतिस्वरूपपरंतद्गतेनस्त्री
द लिंगेनतदर्थस्यनायिकात्वाभिव्यक्त्याऐंद्रीशब्दप्रतिपाद्येनेंद्रसंबंधित्वेनचपरकीयत्वं●भिव्यक्त्येतिबोध्यं॥ वृत्तांतःव्यवहारोमुखचुंबन
रूपः। व्यावल्गादिति। नायिकानुरक्तस्यकस्यचित्क्रीडालंबनंकंदुकंप्रत्युक्तिरियं। हेकंदुकत्वंभगयास्फुरद्रूपाएतयानायिकयारसात्
प्रीतिविशेषात्। सादरमादरसहितंयथास्यात्तथा यद्यस्मात्त्वंसेव्यसेतत्तस्मात्कृतीधन्योसीत्यन्वयः। कथमित्याकांक्षायांसंसेवनक्रि
यांविशिनष्टिव्यावल्गादित्यादिना व्यावल्गनात्विशेषतआसमंताच्चलनात्कुचभारोयत्रतथाआकुलाःक्रीडावेशेनतरत्तलःपर्यस्ताःकचाःके
शायत्र। एवंव्यालोलाःदोलायिताहारावलीयत्रतथाप्रेंखद्भ्यांचंचलाभ्यांकुंडलाभ्यांशोभायुक्तंगंडयुगलंयत्रएवंप्रस्वेदयुक्तंवक्त्रांबु
ण जंयत्रशश्वन्निरंतरंदत्तःकरप्रहारोयत्रतथाअधिकःश्वासोयत्रतथेतिवृत्तांतःविपरीतरतरूपःअत्रापिकंदुकशब्दगतपुल्लिंगेननायकत्वा
भिव्यक्तिर्बोध्या। श्लिष्टानीतिश्लेषमूलकाभेदाध्यवसायविषयाणीत्यर्थः॥ साधारणानीतिश्लेषंविनैवप्रकृताप्रकृतवृत्तांतयोःरंग नु
तानीत्यर्थः। तथाचलक्षणेसाम्यशब्देनश्लेषकृतस्यारासिकस्यचसाम्यस्यविवक्षितमितिभावः सारूप्यात्। सादृश्यात्। पुरेति॥ उत्तरचरितेसीतात्या
गानंतरंकदाचिद्वनंप्रतिगतस्यभगवतोरामचंद्रस्ययमुक्तिः पुरावनवासकालेसरितांनदीनांस्रोतःप्रवाहोहयत्रप्रदेशेआसीत्तत्राधुनापु
लिनंअस्तीतिशेषः॥ तथाक्षितिरुहातरूणांघनविरलभावःविपर्यासंवैपरीत्यंयातःप्राप्तःसांद्राणीविरलतांविरलानांशाखापल्लवादिवृध्यासां
द्रताजातेत्यर्थः। तथाचबहोर्दृष्टस्यकालादनंतरंदृष्टमिदंवनमपरमन्यदिवमन्येपरंतुशैलानांपर्वतानांविशेषानिवेशःविन्यासविशेषःतदेवेदं

वनमितिबुद्धिंप्रत्यभिज्ञारूपांदृढयति दृढीकरोतीत्यर्थः। तत्सारूप्यादिति। वनसादृश्यादित्यर्थः। ग्रामादौकिंवनसादृश्यमित्याकांक्षायां
तद्गर्भविशेषणमाह। कुटुंबिष्वित्यादि कुटुंबिषुकुटुंबिगतायोधनसमृध्यसमृध्योर्विपर्यासस्तंप्राप्तस्येत्यर्थः॥ तत्समाश्रयस्यतादृशकुटुंबिस
माश्रयस्यतथाचसमृध्यसमृद्धिविपर्यासवदाश्रयत्वंसादृश्यमितिभावः। किमस्यसादृश्यस्योपस्थापकमितिचेत् घनविरलेतिविपर्या
न्य समितिभावः। ताभ्यामुक्तसादृश्यगर्भीकरणात्। एतेनैषासादृश्यगर्भविशेषणोत्थापितसादृश्यमूलासमासोक्तिरितिमूलग्रंथानवबोध
वेदि स्तद्वयोः। धर्मेतिभूषणमलग्नकंवेदितव्यं। अथात्राप्रस्तुतवृत्तांतस्यविशेषणसाम्यगम्यत्वाभावादुक्तलक्षणस्याव्याप्तिरितिचेत्
न्य न्नविशेषणसाम्यगम्यसत्वसादृश्यगर्भत्वेपिविशेषणसाम्यगम्यत्वानपायात्। प्राधान्यात्तुपरंसारूप्यस्यगमकत्वोपदर्शनंसारूप्यादि
तिग्रंथेनएवमग्रेपिविशेषणसाम्यात्सादृश्याद्वेतिविकल्पोक्तिरपिप्राधान्याभिप्रायेणैवेतिनिरवद्यमेवमलंकारंनिरूप्यतद्बोधप्रकारमु च
पदर्शयितुंभूमिकामारचयति। अत्रचेति। अत्रएषूदाहरणेषुअप्रस्तुतवृत्तांतस्येतिप्रकृतराजादिसंबंधिनश्चुंबनादिव्यवहारस्येत्यर्थःविशेष्यश्चं
द्रादेःसर्वथाआरोपानारोपान्यतरविषयाःप्रस्तुतानन्वयिनःप्रकृतान्वयशून्यस्ययद्वासनर्थेवेत्यस्यकवीत्यादिनान्वयः। कविसंरंभेति।स्व विशेष्य
प्रतीत्युद्देश्यकशब्दसंदर्भरूपकविव्यापारेत्यर्थः। अप्रस्तुततरूपेति। अप्रस्तुततरूपेत्यर्थः। कुतस्तत्राहमुखमित्यादि। तादात्म्येनचंद्रारोपिताद
त्म्यस्यापिसंसर्गविधयाआरोपविषयत्वात्तस्यचचंद्रत्वावच्छिन्नप्रतिरेकाच्चंद्रत्वारोपेत्युक्तिः। नतुप्रकारतयाचंद्रत्वारोपउक्तइतिभ्रमितव्यं। चंद्रइति
न शब्देनचंद्रइतिविशेषणत्वेनोपस्थितस्यचंद्रत्वस्यमुखेविशेषणतयारोपासंभवात्। एवंजारत्वेत्यत्रापिबोध्यं। तद्वाचकेति। जारवाचकेत्यर्थः।
२ अप्रस्तुतवृत्तांतस्यचुंबनादेरिवाप्रस्तुतस्यराजादेरपिचंद्रादेःसमारोपइतिमतंनिराकरोतिनत्विति २

ननु जारादिपदसमभिव्याहाराभावात् श्रौतारोपासंभवेप्यार्थोजाराद्यारोपोस्तु। नहितत्रापिताहृशसमभिव्याहारोहेतुरूपकध्वनेरुद्भेदापत्तेरित्याशं
क्याह।। निरीक्ष्येति। पयोदोमेघोविद्युत्स्वरूपेण नयनेननिशायामभिसारिकायामुखवीक्ष्य धारानिपातैः सहवांतः किन्त्वयंचंद्रइतिमत्वा आर्ततरंयथा
स्यात्तथा रसास आक्रंदनं कृतवानित्यर्थः। उदाहरण इवेति व्यतिरेकदृष्टांतः। अत्रयथागमकमस्तितथा। दृशस्यसमासोक्त्युदाहरणेऽप्यभा
वादित्यर्थः। तथाचार्थोरोपोप्यनाशंक्यइतिभावः। ननुविघ्नन्नयनैरित्यत्रकिमप्रस्तुतारोपगमकंयेंदभावात्समासोक्तौतदभाववदत्रलो य
गमकंदर्शयितुमाह। तत्रेति। आनुगुण्यात्। आनुकूल्यात्। उपमितसमासस्यपूर्वपदार्थप्रधानतयानयनसदृशविद्युत्करणकतस्य
निरीक्षणेसंभाव्यत्वात्प्रतिकूलमितिभावः। अनुक्तमपि। अश्रौतमपि। रूपणआरोपः। नचेहेति। इहसमासोक्त्युदाहरणे। तथानिरीक्षण
क वत्नयनकरणेनिरीक्षणवृत्तसेतुकृत्वादित्यादित्यादिनामथनकारित्वपरिग्रहः नन्विहापिपरनायिकामुखचुंबनरूपस्याप्रस्तुतवृत्तां
तस्याप्रस्तुतसाधारणधर्मत्वादप्रस्तुतारोपगमकत्वंस्यादित्याशंक्यपरिहरति। नापीति। साधारणादित्यादिनासाहृश्यगर्भविशेष
णसंग्रहः वृत्तांतयोरितिनिर्धारणेषष्ठी। वृत्तांतयोमध्येइत्यर्थः। विद्युन्नयनवदिति। प्रस्तुताप्रस्तुतयोर्विद्युन्नयनयोर्मध्येतेषानय य
नस्यप्राधान्यंतथानास्तीत्यर्थः। सेतुमथकृदितिपाठः।। सेतुबंधनकृदितिलपपाठः कथंचिदुत्तरपदार्थप्रधानसमासात्× दर्थतोनु
वादत्वेनव्याख्येयः। उपसंहरति तस्मादिति। मात्रपदेनाप्रस्तुतारोपव्यवच्छेदः।। विद्युन्नयनवत्समासकृतश्रौतप्राधान्याभावेपिविशेषण
सामर्थ्याद्विगतस्याप्रस्तुतेवृत्तांतस्यार्थतःप्राधान्यमस्तीतिशंकते। यद्यपीति। नप्रस्तुतवृत्तांतात्भिन्नत्वेनावगतस्यप्रस्तुतवृत्तांतस्यप्र
उत्तरपदार्थप्रधानसमासात् न्च

स्मारसंचारः करणे।। विगर्हतेनिंदयति।। रामदर्शनंविनेति। रामकर्मकंरामकर्तृकंचदर्शनंविनेत्यर्थः।। अंतरेणापीति।। विनापीत्यर्थः। तथाचवि
नोक्तिरित्यत्रग्रहणमनतुशब्दग्रहणमितिभावः। प्रकारांतरमाह।। तच्चेदिति। तत्प्रस्तुतंकिंचिद्विनारम्यंचेत्तापिविनोक्तिःकथ्यतइत्यन्वयः।
र इत्थंचकिंचिद्व्यतिरेकेणप्रस्तुतस्यरम्यत्वाम्यत्ववर्णनंविनोक्तिरितिप्रकारद्वयसाधारणंसामान्यलक्षणंबोध्यं। यत्तुयहद्योविनार्थसंबंधएवावि
नोक्तिः इत्यत्रचविनाकृतस्यवस्तुनोरमणीयत्वारमणीयत्वाभ्यांभवतीत्यर्वाचीनैरुक्तंतद्युक्तं। कारणंविनाकार्योत्पत्तिकथनेरूपविभावनालंका
रेतिव्याप्तेर्वारणीयविनार्थसंबंधप्रयुक्तप्रस्तुतगतरमणीयत्वादेरपिलक्षणेनिवेशस्यावश्यकत्वादिति।। आविर्भूतइति। विक्रमोर्वश्यामुर्व
श्यामूर्छापगमवर्णनमिदं। मानवतीविषयनायकस्यपरामर्शोयं।। इयंवरतनुरंतःअंतःकरणमोहेनमानावेशेनमुक्तकल्पाईषन्नमुक्तालक्ष्यतेके
व। पूर्वरोधसंस्तटस्यपतनेनकलुषाअनंतरंकलुष्यापगमात्प्रसादनेर्मल्यंगच्छंतीआन्यतीगंगेवयथाशशिनिचंद्रेआविर्भूतेउदितेसतितमसा
मुच्यमानारात्रिरिव। एवंछिन्नोनष्टःभूयिष्ठोधूमोयस्याएवंभूतानिशिभवस्यकृतक्कजोवह्नेरार्चिः। शिवेवेति। दर्शितमिति। अर्थतोबोधितमित्य
२२ र्थः।। इत्यलंकारचंद्रिकायांविनोक्तिप्रकरणं।। समासोक्तिंलक्षयति।। समासोक्तिरिति। प्रस्तुतेवर्ण्यमानेअप्रस्तुतस्यअप्रस्तुतवृत्तांतस्य
परिस्फूर्तिश्चेत्तदासमासोक्तिरित्यन्वयः। अयमितिइंद्रस्येयमैंद्रीप्राचीमुखमादिभागःवदनंचरक्तो रक्तवर्णः। अनुरक्तश्च।। चुंबनसंबंधःवक्त्रसं
योगविशेषश्चयथाश्रुतलक्षणस्यवक्ष्यमाणोऽसावुदयमारूढःकांतिमान्रक्तमंडलः।। राजाहरतिसर्वस्यहृदयंमृदुभिःकरैः। रित्यत्राप्रकृता
र्ति प्रकृतश्लेषेव्याप्तेराह।। विशेषणसाम्यबलादिति।। विशेषणमात्रसाम्यबलादित्यर्थः।। एवंचविशेषणमात्रसाम्यगम्याप्रस्तुतवृत्तांतत्वंलक्षणंबो
ध्यं। उदाहृतश्लेषेवाप्रकृतनृपवृत्तांतस्यविशेष्यवाचिनाश्लिष्टेनराजपदेनाप्यवगमनान्नातिव्याप्तिः।। संज्ञाप्रवृत्तिनिमित्तमवयवार्थदर्शयति। समासेनेति

8

अ॰ चंद्रिका व्यंजनापेक्षणे ईदृशप्रवादः ॥ कुतो न युक्तस्तत्राह कंदुकइति निर्दिष्टस्य स्वसंबन्धेन ... यत्संबंधित्वेनैवैयविकारोक्तमेवार्थसोपपत्तिक
माह ॥ स्वरूपतइति ॥ अप्रस्तुतकामुकसंबंधित्वानालिंगितरूपेणेत्यर्थः ॥ तथा चारोपासंभवात् ईदृशप्रवादानुपपत्तिरितिभावः ॥ श्लिष्टवि
शेषणतया मयमैंद्रीत्यादौ मुखचुंबनादेः स्वरूपतोप्यारोपस्यैव सत्वात् ... कारणविशेषणतयामुपष्टंभकत्वेन प्रवादोपन्यासः ॥ ननु
तत्रापि तादृशावनितासंबंधत्वस्य तादृशावनिताकृतविपरीतरतस्य च तत्र रूपस्याप्रस्तुतवृत्तौ त... स्य स्वरूपतोप्यारोपस्यैव वक्तुं
शक्यत्वान्न तादृशप्रवादानुपपत्ति... रत आह ॥ किंचेति ॥ युक्तमिति ॥ तत्सामान्यादितरेषु तत्वं धोमितिन्यायादितिभावः ॥ लक्षणमि पा
ति जातावेकवचनं ॥ तदयमुक्तरीत्या यमैंद्रीमुखं पश्यरक्तश्चुंबति चंद्रमाइत्यत्र शक्तिव्यंजनत्वात्प्राचीप्रारंभसंबंधाश्रयश्चंद्रो
पर जारसंबंधि सानुरागं नायिकामुखचुंबनाश्रय इति बोधः अप्रस्तुतवृत्तांतामित्वेनाध्यवसितस्य प्रस्तुतवृत्तांतस्य तादात्म्येनात्र
प्रस्तुतारोपविषये प्रस्तुतधर्मिण्यन्वय इति मते तु सानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयोगाश्रयो ... जाराभि
न्नश्चंद्र इति बोधः ॥ एवमुदाहरणांतरेष्वनेनैव प्रकारेण बोधप्रकार ऊहनीयः ॥ ॥ इत्यलंकारचंद्रिकायां समासोक्तिप्रकरणं ॥ २२
गुणीभूतव्यंग्यस्य प्रभेदस्य समासोक्त्यलंकारप्रसंगात्तद्भेदं परिकरालंकारं लक्षयति ॥ अलंकारइति ॥ अलंकपदत्वोक्तौ तेन च दोषा
भावेनैव गतार्थत्वमिति शंकानिरासार्थं तत्प्रपंचनं चाग्रे करिष्यते ॥ साभिप्राये प्रकृतार्थोपपादककार्यविषयकाभिप्रायपूर्वकेत
थाभूतार्थव्यंजक इति यावत् ॥ इत्थं च प्रकृतार्थोपपादकार्थव्यंजकविशेषणत्वं लक्षणं बोध्यं ॥ ध्वनावतिव्याप्तिवारणाय प्र
कृतार्थोपपादकेति ॥ हेत्वलंकारवारणाय बोधकत्वं विहाय व्यंजकत्वनिवेशः वक्ष्यमाणपरिकरांकुरालंकारवारणाय विशेषणे
ति ॥ तत्र तु विशेष्यं तथेति नातिप्रसंगः ॥ सुधांश्विति ॥ सुधांशुना कलितः उत्तंसः शिखरो येन सइतिहरविशेषणं ॥ उत्तंसः श्री

कर्णपूरस्यात्तु शेखरे चापतंसवदिति विश्वः ॥ सामर्थ्यमिति ॥ प्रायं सामर्थ्यव्यंजकं ॥ तवेति ॥ इंद्रं प्रति कामस्योक्तिः ॥ तव प्रसादात्कुसु
मायुधोप्यहं मधुवसंतमेवैकं मुख्यं सहायं लब्ध्वा पिनाकी धनुर्विशेषः पाणौ यस्य तादृशस्यापि हरस्य धैर्यच्युतिं धैर्यस्ख
लनं कुर्यां ॥ अन्येषां धन्विनो धनुर्धरा मम पुरः के अगणनीया इत्यर्थः ॥ कुसुमायुधइति विशेषणं चेत्यन्वयः ॥ अर्थलक्ष्ये
ति कुर्यामित्युत्तमपुरुषाक्षिप्तेत्यर्थः ॥ अभिप्रायगर्भे ॥ अभिप्रायपूर्वकं अत एवार्थ्यवार्थमात्रविश्रांतत्वाभावरूपेदं न
नपानरुत्थमपि" सर्वेति सर्वेषामनुचितानां रक्तपूयरेतोविण्मूत्रादीनां विधानस्य स्थानभूतस्य कृतघ्नस्य उत्तमान
पानादिकृतोपकारनाशकस्य शरीरकस्येति निंदायां क प्रत्ययः ॥ कृतेत्यर्थेन तत्संरक्षणार्थमिति यावत् ॥ विशेषण
निपूर्वोऽपि क्लानितस्य शरीरस्य व्याख्यामिति ॥ राजानं प्रति कस्यचिदुक्तिः ॥ हे देव रामचंद्र त्वद्गुणानां वंदस्य समूहस्य
वर्णनं कर्तुमहं कथं शक्नुयां शक्तोस्मि वेत्यन्वयः ॥ कुतस्तत्राह ॥ यतोहं एकरूपतया स्थितं वेदसमूहं न व्यासं
अनेकरूपशाखारूपेण न विस्तारितवान् ॥ तथा च तत्कर्ता व्यासोऽनत्पवामीति व्यज्यते ॥ एवमग्रेपि वल्मीकतो वल्मी
कात् जन्मास्यास्तीति जन्मी जन्मीन्न स्यवामीतिशेषः ॥ तथा च नाहं वाल्मीकिरिति ॥ अच्युतस्य नाभौ नाभ्यंबुजे नो
त त्पन्न इत्यनेनाहं च चतुर्मुख इति" सुमहत्त्वस्या ... महाभाष्यं च नामसहितं ... नाभाषितवानित्यनेन नाहं शेषः ... द्विहरत्ना
चित्रो विचित्र अर्थो यस्यास्तो वृहत्कथौ न च कथनेन कथितवानित्यनेन नाहं तद्ध्रुकार्यगुणार्थो वेति सुत्रामिता

८

अर्थ-चंद्रि-रोक इं द्रे गुरु रूप देश को ना स मि त्य ने न ना हं वा स्य ति रिति च व्य ज्यते ॥ उक्ते पूर्वोदाहरणेषु वैलक्षण्यं दर्शयति ॥ तत्रेत्यादिना एकैकं ॥ ए
कस्य विशेषस्य एकमेव समनंतरयोः अनंतरयोः प्रत्येकं ॥ एकं विशेषं प्रति तत्रापि तयोर्मध्येपि एकाभिप्रायगर्भाणि एका
र्थाभिप्रायपूर्वकाणि वा वाक्यार्थेति ॥ न व्यास्त्वमित्यादि निषेधवाक्यार्थे पद्धस्यो त्कर्षेत्याह तुल्ये नांगि मवाक्यार्थे विशेषणत्वा
दिति भावः ॥ तेषूक्तोदाहरणेषु ध्वनिव्यपदेशः ध्वनिव्यवहारः तत्र हेतुमाह ॥ तापहरण इत्यादिना ॥ तापहरणे इत्यादि स
र्व तुष्ट यस्य वा च्य इत्यनेन सामानाधिकरण्येनान्वये ३ उपस्कारकत्वादिति ॥ तथा चापरांग रूपगुणीभूत व्यंग्यभेदत्वान्न
ध्वनिव्यवहार इति भावः ॥ नन्वेवमपि यथाश्रुतलक्षणस्य निःशेष ॥ स्थलेत्यादि ध्वनावतिव्याप्तिरित्यत आह ॥ अतएवे
ति ॥ वाच्योपस्कारकत्वादेवेत्यर्थः ॥ परिकरत्वात् ॥ अंगत्वात् तथा च परिकरपदमहिम्ना प्रकृतार्थोपपादकस्य व्यंग्यवि त्व
शेषणस्य लाभान्नातिव्याप्तिरिति भावः ॥ अपुष्टार्थेति भाव प्राधान्यं उक्तत्वादिति ॥ अपुष्टं लिंगे व्याहतः पुनरुक्तं दुः
मा मंगला व्या इत्यादिना ऽलंकारिके रुक्तत्वादित्यर्थः ॥ कथं तर्हि नैरर्थक्यालंकारत्वेन कथनमत आह ॥ एकमिति ॥ का ह्रेति
साभिप्रायेत्यर्थः ॥ दोषत्वाभावे नेति ॥ अपुष्टार्थत्व दोषत्वाभावेनेत्यर्थः ॥ नेष्टालंकारसंमत्या स हृदयवैमुख्यं रूपदूषक
ताबीजाभावादिति भावः ॥ विच्छित्ति श्रमत्कृतिः परिकारत्वोपपत्तेः परिकरस्यालंकारत्वोपपत्तेः तत्र दोषस्याप्रसक्त्या वि
च्छित्ति विशेषस्य तदभाव प्रयुक्तत्वासंभवात्तत्र योजकमलंकारत्वमावश्यकमिति भावः ॥ यमुक्तमुदाहरति ॥ यथेति
निर्जां खता मतिक्रम्य यद्यपि जेतव्यं अर्थाद्देवतांतरं पूजयेत्तदा उ भयतः लोके दूयाल्लव्यवतेफलमिति अघं पापमपि सुपुतेस श्री
वंते प्राप्नोतीतियावत् ॥ कालिजादेवता तत्रादा ॥ वयं वनवता प्रशस्तवनयुक्तेन क्षितिस्तितागोचर्धन भिरिणैव सदैवत

य स्तुत विशेष्येणान्वयात्कथमप्रस्तुत वृत्तांतस्य प्राधान्यमिति शंकानिरासायाह । विशेष्येणैवेति । नतु तद्विशेषणीभूतप्रस्तुतवृत्तांतेनेत्येव
वकारार्थः समाधत्ते । तथापीति । अयमाशयः नात्र श्लिष्टादिविशेषणैः समर्पितः परनोयिकाधुखचुंबनादिरूपोप्रस्तुतवृत्तांतः प्रागेवकाव्यादिधुलत्ता
प्रस्तुतगतत्वेन भासते तद्बलादप्रस्तुतजाराद्यारोपावगतिः स्यात् अपि तु तटस्थ्येनावगते तस्मिन्प्रस्तुतासंबद्धस्य कविसंरंभगोचर
त्वायोगात्प्रस्तुतसमारोपितत्वेन पर्यवसानमिति । नन्वेवं तर्हि प्रस्तुतवृत्तांतस्याप्यप्रस्तुतवृत्तांताश्रयधर्मिण्यन्वयोस्तु असंबद्धा
भिधानप्रसंगपरिहारस्य तुल्यत्वा[redacted]दित्याशंक्याह । तथाहीत्यादि । एवं च योग्यतारूपविनिगमकविरहे च मास्तु तर्हि कस्याप्यन्व
यस्तत्राह । अवश्यमिति । अन्यथासंबद्धाभिधानप्रसंगापत्तेरिति भावः । किं तर्हि विनिगमकं तत्राह । श्रुतएवेति । तथा च श्रुतप्रस्तु
तार्थोपस्कारकतया चमत्कारहेतुत्वमेव विनिगमकमिति भावः । अप्रस्तुतस्य । अप्रस्तुतवृत्तांतस्येनन्वेवमिति । एवं अप्रस्तुतस
स मारोपांगीकारे । विशेषणानामित्यादि । विद्यानाथोक्तलक्षणं । प्रस्तुतवर्तिनां विशेषणानां साम्येनान्वयः प्रस्तुते समारोपार्थं अप्रस्तु
तधर्मिव्यंजनानपेक्षायामपि समारोप्यमाणवृत्तांतविशेषणत्वार्थं तदपेक्षणे न लक्षणासंगतिरित्याह । स्वरूपत इत्यादि स्वरूपतः अप्र
स्तुतसंबंधित्वेन ज्ञायमानस्य न त्वपेक्षा सत्वेपि विशेषणसाम्यस्य तद्व्यंजनासामर्थ्यात् लक्षणासंगतिः तादवस्थ्यमित्याशंक्य साक्षा
दसामर्थ्येपि वृत्तांताभिव्यक्तिद्वारा तत्संभवान्न दोष इत्याह । न चेत्यादि । तदीयत्वानुसंधानं कामुकसंबंधित्वानुसंधानं तत्र । मुख
चुंबनादेः अनुसंधानवदिति पाठः । अनुसंधानवदिति पाठे यथेत्यस्यासंगतेः अतएव अप्रस्तुतव्यंजनस्यापेक्षणादेव न त्वप्रस्तुतधर्मि
॥

४ लक्ष्ये लक्षणं संगमयति अत्र चेति ४   ५ दाज्ञानं प्रति कृपे रुक्तिः । तव गुणान् वक्तुं फणीन्द्रः शेषः

सहृदयसाक्षिकं । एवमनन्वयोपमेयोपमेययोरपि न सादृश्यस्य चमत्कारितया प्राधान्येन विवक्षा किंतु द्वितीयतृतीयसदृ
श्यव्यवच्छेदापाद्यतयेति न तयोरनुपमान्तर्गतिर्युज्यते । अन्यथा सादृश्यवर्णनमेव सिद्धत्वात्तथा ह्यापीति भावः ॥ इत्यलं
कारस्य इह कार्या परिकरप्रकरणं ॥ २४ ॥ साभिप्रायइति । अत्र विशेषणपदस्थाने विशेष्येति प्राप्तिश्चेत्पूर्ववल्लक्षणं बोध्यं ।
तत्त्व परिकरेऽतिव्याप्तिवारणार्थं । यद्यपि देवांतरव्यावर्तकतया चतुर्भुजइति विशेषणं तथापि न पादिसाधारणं द्रवपद
शक्तेर्विष्णो नियमनेन विशेष्यप्रतीतौ पर्यायकतया विशेष्यपदत्वमभिमतं बोध्यं ॥ असंदिग्धमुदाहरति समर्थ इत्यधो   फणींद्र इति
ति कशब्दो महदंतरं सूचयतः सहस्रमुखवादीत्यादिनासहस्रबाहुत्वसहस्रनयनमेलयोः संग्रहः अत्रानेकेषां विशेष्यपदा
नां तत्तदभिप्रायगर्भत्वे विशेषः ॥ ॥ इति परिकरांकुरप्रकरणं ॥ २६ ॥ श्लेषं लक्षयति नानार्थेति । नानार्थस्य शब्दस्य सं
श्रयो योजनं श्लेष इति लक्षणं वर्ण्येत्यादि विभागं वर्ण्येत्यादि चावर्ण्यं च वर्ण्यावर्ण्ये उभयं च एतत्रयाश्रितत्वात्त्रिविध इत्यर्थः ।   वर्ण्यावर्ण्योभयं
सर्वेति । सर्वदः समाधवः पायात्तु यः अगगोवर्धनपर्वतं गां पृथ्वीं च वराहावतारे धृतवानिति विष्णुपक्षे ॥ हरपक्षे तु सउ
माधवः सर्वदा पायात् ॥ यो गंगां धृतवानित्यर्थः हरिणेन मृगेण अंकस्तया आहिता कृता सक्तिः संगो यस्येति चंद्रपक्षेह
रिणा सूर्येणेति कमलपक्षे । उच्चैरतरशस्त्रपातेरुद्धे छलकीलालं रुधिरं यस्य स वाहिनीपतिः सेनापतिः तथा वाहिनीनां न

दीनां पतिः समुद्रश्चेति पक्षे कीलालं जलं समितौ संग्रामे तथात इति येन करुणायुक्तांतः करणेन इह कर्तापि अदरो भयशून्यः काकस्त्रा
तो रक्षितः न तु हतः स पवित्रनामा रणे ख्यातः विश्रुतो रामो मे शरणमस्त्वित्यर्थः ॥ कृष्णपक्षे तु काकोदरः कालियसर्पः पूतनाया राक्षस्या
मारणेन ख्यात इति विशेषः नीतानामिति दयितां प्रति नायिकोक्तिः तव दृक्षणेनेत्रे कमलानां पद्मानां हरिणानां च स दृशो स्त इत्यन्वयः
कीदृशानां वने जले अरण्ये च रुचिं प्राप्तानां तथा लुब्धेर्लोभशीलैर्भूरिभिः शिलीमुखैर्भ्रमरै राकुलीभावं प्राप्तानां नीतानामिति पद्म
धै: पक्षे हरिणपक्षे तु लुब्धैर्व्याधैः कर्तृभिर्भूरिशिलीमुखैर्बाणैः करणभूतैराकुलीभावं चपलत्वं नीतानामित्यर्थः । मृगपक्षे देकमल इ
ति विश्वः ॥ असाविति । उदयशैलं अभि दृष्टिं चर तं रक्तवर्णमनुरक्तं च मंडलं बिंबं देशश्च राजा चंद्रो नृपश्च । मृदुलैरलसैर्नवैः अभ्रे
ध श्चकरैः किरणैः प्रत्यर्थिनोश्च प्रत्यग्रो दिते ति अभिनवो दितेत्यर्थः ॥ ननु प्रकरणे नाभिधायां नियमनान्नादत्र । कृतार्थस्य व्यंग्यत्व
मेवेति कथं श्लेष इत्याशंक्याह । यदिति । अलंकारस्येति । न चैवं शब्दशक्तिमूलवस्तुध्वनेरुच्छेद इति वाच्यं शनिरशनिश्च तमुच्चैर्नि
हंति कुप्यसि नरेंद्र यस्मै त्वं । यत्र प्रसीदसि पुनः स भात्युदारोनुदारश्च इत्यत्रानिधिकृत्यरूपे प्रस्तुतेऽशनिशब्दे नाभिधयाप्रती
यमानेपि तन्मूलकस्य विरुद्धार्थस्य रूपिततदनुयतेनार्थ मेकं काव्ये कुरुत इति वस्तुध्वनेरत्रानिशब्दशक्तिमूलस्य संभवात् अलंकारस्य
ण तस्योपलक्षितो तु अन्योन्यसंनिधानबलात् परस्परस्य सर्वथा सर्वं ध्यर्थवाचकशब्दसमभिव्याहाररूपशब्दांतरसंनिधिबलात्तते
थाचा प्रकृते यभिधाने यामकमस्तीति भावः ॥ एतावता पूर्वापरभावमात्रेण तस्याप्रकृतार्थस्य । गूढश्लेष इति गूढत्वं चाप्रकृतत्वे

१०

अलंकारचंद्रि° टी° ५

नद्दितीयार्थस्य शीघ्रमप्रत्ययात्॥ अदमिति॥ माघे रैवतकगिरिवर्णनं॥ अयं गिरिस्तटी बिभर्तीत्यन्वयः॥ किंभूताः अत्यंतक
ठिनाः प्रकाममुर्वीः अतिमहत्यः अलघुभिर्विलंबमानैर्मेघैर्व्याप्ताः निरंतरं प्राणिनामगम्यस्वरूपाः परिणतास्तिर्यग्दंतप्रहारिणः
दिग्गजा यासु ताः तिर्यग्दंतप्रहारी यो गजः परिणतस्तत्सदृशो हलायुधः स एव रूपा पक्षे तु जठरा जीर्णाः पयोधराः कुचाः अग
म्याः संगमायोग्याः परिणते प्रकटे दिक्कुकुभिके यासां ताः इत्यर्थः दिक्कु वर्तुलं दन्तानक्षतं॥ करिकानखक्षतं॥ दिग्दष्टं वर्तुलाकारं
करिकानखरेखिके इति यादवः॥ मंदमिति ओषधीनां पत्युश्चंद्रस्य सान्निध्ये सति अयमोपलाः सूर्यकांता मंदीभूततमस्तिं
ध्रत्वं ततः तमः दर्शितः श्च वपुः पुष्टत्वं येन तथाऽभवत्॥ दृष्टवक्तिमिरजं दोषध्वंसो सिषेविरे। पक्षांतरे ओषधिपतिवै
द्यः एवं मंदाग्नित्वं शोफ्रानिमिराजिरोगविशेषाः एतां तादिविस्यादिपदा प्रोगिवे घदसोतः परिगृह्यते अप्रंगम्लेषद्गति
तथा च श्लेषमूले व्यंजनाविरहाद्प्रकृते तत्स्वीकारे श्लेषव्यवहारः सर्वेषामनुपपन्नः स्यादिति भावः रम्या इति माघे एव
द्वारकावर्णनं यस्यां द्वारकायां युवानो वधूभिः समं वलभीः प्रासादोपरितनगृहाणि अध्यासेवंत सेवितवंतः किंभूताः रम्या
इति हेतोः पताकावैजयंतीः प्राप्तवतीः विविक्ता विजना इति हेतोः रागं रतिं वर्द्धयंतीः नमंति वलीकानि छादनपटल
प्रांता यासां ताः वधूपक्षे पताकाः सौभाग्यानि पताका वैजयंत्यां स्यात्सौभाग्ये नाटकांकयोरिति मेदिनी॥

काः देवतसहिताः स एवास्माकं देवतमित्यर्थः॥ अनयेत्यादि अरक्षकेण अहिडुहाई देरेण किं प्रयोजनमिति शेषः॥ अहिर्वृत्रासु
रः अहिर्वृत्रासुरे सर्पे इति विश्वः॥ नन्वेवमपि तत्रैवालंकारता स्यान्नानुसुप्रसंगकक्षितोनं सहृत्यादावत आह॥ एव
मिति॥ विच्छित्तिविशेषे वेति। दोषाभावप्रयुक्तविच्छित्तिर्व्याहतेत्यर्थः। ननु यमकादावपि तादृशविच्छित्तिविशेषमानाभावः विच्छित्ति
सामान्यं पर्युदस्तदोषाभावेनाप्युपपन्नं॥ आपत्कालपर्युदस्तस्य मूर्च्छोचहीनतादोषस्याभावेनैवतदानीमपि मूर्च्छोचकर्तुरतिश
याध्यानमिति नालंकारत्वसिद्धिरित्यत आह॥ अपि चेति। भस्मोद्धूलनभद्र मस्तकभवते रुद्राक्षमाले शुभ्रं हा मोपानपरं
परां गिरिसुताकांतालयालंकृतिं॥ अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे
निधीयामहे इत्यादौ मोक्षस्य महामोहत्वे सुखालोकोच्छेदित्वसुखालोकोच्छेदिनीत्यकपदार्थो हेतुरिति काव्यलिं
रूप गमलंकारत्वेन यथा स्वीकृतं न तु निर्हेतुत्वदोषाभावमात्रतया विच्छित्तिविशेषस्यानुभवसिद्धत्वात्तथेहापी
ति भावः॥ ॥(इत्यलंकारचंद्रिकायां) (परिकरेति व्याप्तिवारणार्थः फणींद्र इति। राजानं प्रति कवेरुक्तिः तव गुणान्
वक्तुं फणींद्रः शेषः समर्थ इत्यध्याहार्यं। एवमग्रेऽपि हे हयाधिपः कार्तवीर्य आखंडल इंद्रः उभयत्र गुणानित्यनुष
ज्यते॥ एषमर्त्यधर्मः अहं केते गुणाः केति कश्शब्दो महदंतरं सूचयतः सहस्रमुखत्वादीत्यादिना सहस्रबाहुत्वसहस्र
नयनत्वयोः संग्रहः अत्रानेकेषां विशेष्यपदानां तत्तदभिप्रायगर्भत्वं विशेषः॥ मुखतश्च मत्कारितया विवक्षितमिति

सगमनुरागे विविक्ताः सतिलेनपवित्रा नमं त्रिवलीकाश्रेणिः मशहवला क्षिधूगताथीतरूस्याप्यवगमात्कथंगूढत्वमित्याशंनचेति। परेंदुस्यस ग
इत्यत्रे वाक्षिसंधुमो भवेद्विस्त्यतेननान्वपः एतस्मिन्निति। तत्रैनरैवतकगिरिवर्णनं। एतस्मिन्गिरौ महत्यः सरस्यः वाल्मीके मुनेर्गिरां सा
तां धर्म्यमाहृस्यं दधति धारयंति। किंभूतानां गिरां वर्णनः एतस्मिन् गिरौ महत्यः सरस्यः वाल्मीकेः अरहितोसंबद्धो रामलक्ष्मणो यासु तथा
भूतानां सरसी पक्षे अरहिताः संयुक्ता रामाः पतयो यासां तथाभूता लक्ष्मणाः सारसवनितायासु ताः इति किंभूताः सरस्यः अधिकाः ज
लक्षोभं विहस्यः पवनसंभूतेन वेगेन संक्षोभं तरंगाकुलत्वं नीताः प्रापिताः। वाल्मीकि गिरस्तु अधिकाः कपयो यासु ताः संयुक्ताः
इ पवनभुवा हनूमता वेगेन निजेन संक्षोभमुद्वृत्तत्वं प्रापिताः इति। ननु नैवापि समम् इत्यस्य तुल्यार्थत्वात् साधर्म्यं निबंधोस्तीति कुतो न श्ले न्व नो
षाक्षेपस्तत्राह सममिति द्राक् शीघ्रं साम्यं साम्यार्थकत्वं। तथाचानुपपत्यभावान्मूलकआक्षेपो न संभवतीति भावः कथं तर्हि
तदवगमस्तत्राह अर्थैसोदर्यैति विशेषणानां व चमत्कृतेरनुसंधानात्तदन्वयतात्पर्यमहइति भावः तदनुश्लेषानु न्वये
संधानानंतरं तद्बलात् श्लेषबलात् साधर्म्यधीर्थैति साधर्म्यरूपार्थस्येत्यर्थः अर्थसाम्याभावेपि सकलकलेपुरमेतत् जाल सेप्रति
सुधांशुबिंबमिवेत्यादिवच्छब्दसाम्यस्य संभवादिति भावः एवकारेण स्यत्व व्यवच्छेदः तत्र तयोर्मध्ये शब्देति जतुकाष्ठन्यायेन श
ब्दश्लिष्टयोरेवश्लिष्टत्वादिति भावः अर्थेति। शब्दाभेदादेकवृंतगतफलद्वयन्यायेनार्थयोरेवश्लिष्टत्वादिति भावः केचित्
अलंकारसर्वस्वकारादयः उभयमपीति संगाभंगश्लेषद्वयमपीत्यर्थः शब्दस्य परिवृत्त्यसहत्वेनान्वयव्यतिरेकाभ्यां तद्वत् प्यां
त्वावधारणादिति भावः अन्ये मम्मटमहाः नन्वभिप्रायस्थोर्थालंकारमध्यकथनादवगतस्यापि विशेषतः कथनं मतरेण कथं र
स्या

मुपपत्तिरित्याशंक्याह एतदिति यच्च पुरःप्रेक्षाग्रंथानंतरं चित्रमिमां सौनकोपि दृश्यते तथाप्युपमाशयः उन्नीयते। चमत्कारश्चमुखप्रेक्षितादर्थालंकारत्वमिति। अनुप्रास
यमकादेस्तु न चमत्कारश्चमुखप्रेक्षितमिति न तथा मर्थालंकारत्वमपि तु शब्दवैचित्र्यात् शब्दालंकारत्वमेवेति [illegible] । अप्रस्तुतेति। सामान्यप्रस्तुत
प्रशंसाः प्रस्तुताश्रयाः प्रस्तुतमाश्रयः प्राधान्येन तात्पर्यविषयो यस्याः सा यथाभूता प्रस्तुतपरमप्रस्तुतवर्णनमप्रस्तुतप्रशंसेत्यर्थः कुडाव। कृतीकुशलाः शकुंतेषु पक्षिषु मध्ये। पक्ष
तकः शकादिर्द्रादन्य न यात्यतद्रूपमर्थः कार्यमिति। कार्ये प्रस्तुते सति तदन्यस्य कारणस्य ववः प्रतिपादनं। निमित्ते कारणे प्रस्तुते सति तदन्यस्य कार्यस्य। एवं सामान्ये प्रस्तुते स
ति तदन्यस्य विशेषस्य विशेषे प्रस्तुते सति तदन्यस्य सामान्यस्य। तुल्ये प्रस्तुते तदन्यस्य तत्सदृशस्येत्यर्थः अप्रस्तुतस्य प्रतिसंबंधिपरत्वात्। तद्रूपेत्यादि आरसेवि
वद्धाः यो वद्धिमाः स्रवाः स्कंधको मानिते जीटिकां व्याघ्रा अंसभित्तिस्कंधदेशो यस्यैवंभूतः शुनकः मृगपतेः सिंहस्य पदवी स्थानं च यो यातो पि तं तादृशः
युक्तत्वेन सिंहसाम्यं प्रापित इत्यर्थः तथापि मत्तानां मिमानां गजानां कुंभतटस्य पाटने विदारणे लंपटस्य व्यसनिनो हरिणा नामधेयस्य नादं सिंहना
दं कथं करिष्यतीत्यर्थः अभिनयति अनुकुर्वीतीति समग्रं तं वै ध्येयं मूर्खे मूर्खैर्वै ध्येयं वा लिशाद्यस्यमरः अत्र निति। छिद्राणि रंध्राणि दोषश्छोना
नि च कंटकाः शूकाः खलाश्चा। भंगुराः भंगशीलाः गुणाः भाग्योदयः ते तव स्थ्या। अत्र स्तुति निंदो दासी नस्य रूप स्यानमात्रमिति श्लिष्ट विशेष
णत्वमिति चमेदः एवं चेति। कुत्कोहाहरणेषु प्रस्तुत परस्याप्रस्तुतवर्णनस्य त्रिरूपत्वे सतीत्यर्थः विधायेति। येन रः मनुष्याः सक्तो ये रोत
नैवैरं विधायो दासि नाभोति [illegible] चिषिमग्निं निक्षिप्य अभिमारुतं पवनेनाभिमुखं शरं रतेनिद्रां कुर्वीतीत्यर्थः सौहार्दे इति साहार्दं नि
मैत्र्यात्पेन स्वर्णरेखा इति रूपके। तासां परीक्षणे निकषोपलः परोक्षमिति संज्ञितः कोप्यस्ती [illegible] वयः। अंकेति भृंग कौच्छ नइस्युच्यते इति शेषः निषु
रक्षितानि निरस्तानि मृगयूथानि येन तादृशः केसरी सिंहो मृगाधिपइत्युच्यतइति विशेषः शुति धूतो गंभीरार्थाखनागते खस्या कारास्य नीलि मा पेनेति मडल
विशेषणम् आश्रितेति हे देव प्रतिमा संभिन्ना अमततु लपश्च ज्ञात्वा विस्मोल दमाकाशमिनपदं चरणमाश्रित्य देहस्य क्षये उपनते सेपने ते संपन्न दिव्यदेह
स्याभिमुखत्वं येषामेवंभूताः संत सदा स्वरूपेसुहृदि मित्रे न नमं लावण्य स्वरूपस्य पुण्यस्य निर्वचेयं बिंबस्य मिहिरं सूर्यं प्राप्ति। यांतीत्यन्वयः
मंत्रलिंगादिति। नवो नवो भवति जायमान इत्यादिमंत्रसामर्थ्यादित्यर्थः मंत्रस्य मानांतरसिद्धार्थानुवादकत्वादाहरुद्धेति श्रुतिरिति तत्तु तुदुष्यते विधुनु ते तस्य प्रियाशा

अलंकारचंद्रिका

मालतीकेशरप्रियायाः सा तास्तथा तत्त्वं शिथिलं कुर्युरित्यन्वयः तदैव निरीक्षणकार्यत्वमेव अथाखिलैति इषस्त्रीयस्वरूपायोक्षित्तस्यथेः शमपि अप्रस्तु
तगुर्थः कार्यत्वमपि अपि ना प्रस्तुतबुधो कारणत्वं प्रागुक्तं समुचीयते त्वं गामाईच हृदकस्यचित्तेन भासते मालतीशशभृल्लेखा कदलीनां कठोरतेति।
तुल्ययोगितायां पुरुदाहृता ननु कार्यरूपेणाप्रस्तुतेनार्थेन प्रस्तुतं स्यात्तत्कारणमवगम्यते सा कार्यनिबंधना अप्रस्तुतप्रशंसोच्यते न चोदाहृतेषु
तत्संभवः मालतीकेशरत्वादेरप्रस्तुतस्यार्थस्याकार्यतापास्तत्वेयेव दर्शितत्वात् एवं प्रस्तुतस्य कामिनीत्वादि निष्ठसौंदर्यातिशयादेर्निरीक्षणस्ये
व कारणत्वेन स्वरूपतस्तस्याकारणत्वादित्यत आह अर्थस्येति अयमाशयः अर्थस्याप्रस्तुतत्वे सति तत्र दृष्टे प्रस्तुतत्वात्कार्यत्वाच्चैनताव
दप्रस्तुतकार्यत्वांशासंभवः अर्थत्वस्य प्रयोजनाभावेन लक्षयोः निषेधाख्याव्यावर्त्तकत्वान्नापि प्रस्तुतकारणत्वांशस्यासंभवः स्वरूपतस्त
स्याहेतुत्वेपि ज्ञातस्य हेतुत्वादिति ननु गतिसौंदर्यादर्शनेन भेदहेतुर्न तु ज्ञायमानं गतिसौंदर्यादि तदभावे विज्ञानमात्रात्कार्योत्पत्तेरित्यस्वरसा
या १ दाह वस्तुतस्त्विति तदिति रेकेतस्याः प्राचीनोदाहृतोप्रस्तुतप्रशंसा या अतिरेके प्रकारे पर्यवसन्नेत्यर्थः तापमिति हे हर तव श्वासरूपचंदमारुतेन निबु धि
सीकृतस्य बुसरहितीकृतस्य स्मितरूपस्य अच्यात्सितकौमुदीकादिना पत्र यो षधश्रेष्ठस्य विप्रकीर्णा कदंगरचयांपुस संभवहृद्वेते ज्योत्स्नकस्य चंद्रस्य कि
स्व रणाजगति भ्रमंतीत्यन्वयः नत्सारतररूपः किरणसारतारूपः लवमिति हृतसारमिसुदाहरणे चंद्रे रूपोमानोपमेयप्रदार्थावविश्यचंद्रसारांशार दन
णस्य रणस्या स्याकारेसतः कविप्रौढोक्तिकल्पितकारणत्वेनासंभवव्रपि द्रष्टव्यं कालिंदीति नर्मदायाः समुद्रस्य च संवादोयं तत्रप्रथमनुनाभोक्त्यासस
मुद्रेण कालिंदीत्युक्ते कोपात्वा त्वं नर्मदायाज्ञ्चत्तारं हे कुंभोद्भव अगस्त्यमुनेः जलधिरिति ततः पुनः समुद्रस्य प्रति वचनं अहं जलधिर्वामिमं शत्रोर्नीम म

कस्माभेतेते कासीति सा पुनराह नर्मदाहमित्यादि ततः समुद्रः पुनराह तर्हि कुतो मालिन्यमनुभवसीति सा पुनराह मिलत्कज्जलैः मालवेंद्रवां
२७ गनानां नेत्राश्रुभिरिति ततः किमासां जातमिति समुद्रस्य प्रश्नः कुंतलेंद्रशाधिपः कुपित इति नर्मदाया उत्तरमिति अत्र कार्यकायाम प्रस्तुत
नोला प्रकरणात् प्रस्तुतेनेति प्रधानत्वेन प्रस्तुतेनेत्यर्थः अभिव्यंजकं प्रस्तुतवर्णनं प्रस्तुतो कुंतलेश्वरः प्रस्तुतस्याभिव्यंजकत्वाद कुररवांकुरस्येति युक्ततेः किमि
तिहे भ्रमर पालत्वं विद्यमानायां केतकेसयाकेतक्याः कथ्या पुत्र्या केतक्या किं प्रयोजनमिति प्रस्तुतेन भ्रमरवृत्तांतेन मधुमनोरागिण्यां सत्यां किमुद्वेग
कारिण्या परं वनितया तिनायकवृत्तांतः प्राधान्येन प्रस्तुतोभिव्यज्यते कथमिहरंगवृत्तांतस्य प्रस्तुतत्वं तत्राह रहेति तथा च भंगसंबोध्य कुचे
ये तैर्त वृत्तांतोपि प्रस्तुत इति भावः अनामंत्रणीयामंत्रणेन संबोध्यात्वायोग्यसंबोधनेन वाच्यासंभवात् भृंगसंबोध्यकवाच्यस्यासंभवात्
दृ कस्त्वमिति शाखोटकृत रूपप्रतिकस्य विधिकस्य प्रश्नोक्तिः कथयामीत्याद्युत्तरं वैराग्यादिव वदसीति पुनः प्रश्नः साधु विदितमिति शाखोटकस्यो ग्य
त्तरं कस्मादिदं वैराग्यमिति पुनः प्रश्नः कथ्यत इति पुनरुत्तरं प्रतिज्ञाय शाखोटक आह वामभागे नोपलक्षितोत्र वयोक्तितं पांथेजनः सर्वतनासमिस
त्रिच्छायादिभिः सेवते आश्रयते ममपुनर्मार्गे स्थितस्यापि न छायाविपरीतप्रकार संपादिकेति भूताधारत्वादिति भावः वापेनेत्रिमार्गे निरस्थितं अस्यंतो आ
रोपणात् वरवर्णिनीतायामिति चेस्याया मिति च विषयसत्तामात्रं तद्विषयेरस्यार्थः विटानां सर्वस्वस्यापहरणापः संकल्पस्तन्नरूपः प्रापेति वेश्या विषूर्णे अ ये
न्येति द्रुमंग अन्यासमुपमर्दक्षमासु सुमनसां पुष्पाणां लतास्तनावत्तयावतन नवमालिकायाः कलिकासे जातरजस्का भवतिलोलंबपलमेनीविनोरय
ल लोकैभिमितिक्रियाविशेषणं वा नवमालिकायाः लताविशेषस्य वालामभिनवो असंजातरजस्का कलिकामकालव्यर्थं किमिति कदर्थयसि पीडयसीत्यन्न
यः रजः पुष्परजः स्त्रीणां रेतश्च स्पृश्यशनीति एतद्वचनं स्पृशतिसन्नीत्यर्थः कोशाति इयं नलिनी कमलिनी कोशो द्वंद्व मुकुलयुगलं कादंबस्य हृ

अलंकारचंद्रिका।

सस्य चं चा इस्तं कृतक्षतं धत्ते आपि तथेयं तस्याम स्यल ता कृत नंपल्लवं पुरुषे कोकिले रा स्वादितं वर्णितं धत्ते दक्षिणे कायानाप्यास्ते मिथः परस्परं
सखी जनस्य वरे आ कर्ण्य प्रपरक्तता नाय काकमलं मुकुं जाम्रपल्लवस्य जैनैतामदी यस्तनाधर स्तन रत्तौ तं कथयंती ति तात्याचैलस्य रक्तं स्यात नं यातेन स्तनतटे ति
स्यदर्थे पिं वरूपम धरे पाणि ना निरोदधे आ छादितवती सन्वयः अन्या पदेशेति अन्यस्यापदेशेनमिषेण प्रतीत दृशमित्यर्थः तदीपमेवम घदर्शय ति अ
प्रस्तुतेस्या दि। यवस्तापि तमिति प्रस्तुत त्वे पिमुख्या तयाता सर्वो भावोंर त्राप्यभि धीय ते वस्ता नाभा वादिति भावः साम्येनेति साअलंकृति ध्वनेः सकादर्शान्ये	या:
वेत्यर्थः प्रस्तुत त्वलं भनेनः प्रस्तुतत्व प्रस्तुते रात्रिरिति हे विलोचने शिवाकस्याया रूपा को चनअनिर्वच नीयप्रभावा रात्रि शिवरात्रि रित्यर्थः संनिधत्ते संतिष्ठति	स्या
भवति अतः युवां अप्रमत्ते जाग्रत्ते जाग्रद्रूपे भवतं युतत्तां ग्राहयुवयोः सकाशेसमीपे अविरिक्तसमान धर्मो स्वदेशः स्वाकस्मिन् प्रविष्यतिस्तनीयं लोचने भावेभ	ले
विष्यतीत्यर्थः तदेकदेशा तपति शिवरात्रि माहात्म्यप्रयुक्त त्वेहेतुः तत्वविवर्ण्य ते तद्दृष्टं। उदाहृतकाव्य वा यं एवं चैकदेश्ये कथने तु भावसंबंधाभिनिवेश
न वमत्र दर्शितं वहंती तिभगवत्याः श्रीमंतवर्णनम दं अपिशिवेसीमंत सरणि नंक्षिमंत नोस्ति त्यन्वयः कीदृशी रसं दूरं वहंती किमिव प्रबलानां केशपाशस्	तव
पांधकारश्रेणीनां समूहै वैदीक्तं बाला के किरणमिव स्वर्णिंदुकवत्वेहद्दनर्योर्दर्थे उपरि पापपरी वाहरूपा सीतं सिं स्वर्णि त्यस्तेति परीवाहे जउनिर्गममा
र्गे जलो छ्वासाः परीवाह इत्यमरः अंगेति विरहस्तेताप वैवर्ण्यं नं अंगसंबंधं मृणालं कोउ ते भ्यो विचेर वरत्तित्तं नां तस्यां हृदिर्थे कां तिमयतन या ज्ञो तिंता पातित्रायेन
मलिनीभावात नास्तामौक्तिकेश्वासानित्तीरस्य पुष्टीयतेतारे इश्लीलमणेः पदवीतत्त्वसाम्यं प्रेरहते प्राप्नोतीति तथा कुचयों ईं तानि ति तयं हिमवान्कुकापूरं क्षणदी	गा
वरूपतां धत्ते एवं कुरते लेधोरास्तपेपा सित्तं जलेन तस्मायः पिंड पति नजे लचलसे लीयते। वायातिः गयात्तं वोयं प्राप्नोतीत्यर्थः उदाहरणद्वयेपि कार्यनिबंधनत्वस्य कं
नत ना यमिति निर्देशस्य। स्त्यादि विभावादु उत्पमित्युपलक्षणं अप्रस्तुत प्रशंसा रूपिनेति बोध्यं किंकृतस्त्व चमत्कारोत आह विंविति परीतिरत्ना वेल्या	दू
वाच्य	त्र

दि४

भि	तयः सुकृतमुपयंतिअप्रियादुष्कृतमिति कौषीतकि श्रुतिः स यावदुत्क्षिप्येत्मनस्तावदादित्यं गच्छतीति सवायुमागच्छति सत्रवि
जिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वं आक्रमते स आदित्यमागच्छतीति श्रुतौ असा दित्यमागच्छत्य नंतरं स आगच्छतिवि	स
रजानदीं तां मनसैवात्येति तत्र सुकृत दुष्कृते विधूनु तइति श्रुतौ शारीरके ति शारीरे श्चा शरीरी रस एव शारीरं क आत्मातत्प्रति पादके
त्यर्थः अर्थवशात प्रयोजनवशात् पूर्वं पापादित्यागामोक्ष वि रौमार्ग प्राप्तिरे वकत्त्व प्राप्ते रसंभवे नपाठ क्रमस्य अर्थक्रमेण बाधा
इत्यादि ति भावः स्थापितरिति सां परायेतत्र व्याभावात् तथा चान्यस्ति नास्तीपाधिकरणे सिद्धांतित इत्यर्थः नाथेति हेनाथ विलोलत्र
रणनखप्रक्षालनजलं गंगारूपेण लग्नाः तेषां नखानां कोतिले रकापिका समुद्रं प्राप्ताः तारवेनकपिका कास्तस्य जलधेर्मथनेन सांद्र
ताप्राप्तान्तेन समुद्रसंबंधिनवनीतस्य चंद्रस्य पदं प्राप्ताः चंद्ररूपेण परिणता इत्यर्थः तथा तद्वारेण तदित्यनंतरं हेतुरिति शेषः तेषेत्तुने	द्वि
खकोत्युत्कर्षस्त्यर्थे॥ अस्याश्रेदिति अस्याः कामिन्यागतिसौकुमार्यं हंसेनेत्यध्याहरेण अन्वयः एवं प्रज्ञापो भाषणं यदि दैवेतत्ते	श्रु
दासाभ्रसि छोमालती दृषत्प्रायेच पाषाणतुल्ये च लक्ष्य तइति कांतिदृष्टश्चेत्से दाकमलो लक्ष्मीः काषायं वस्त्रमालंबता माश्रयतु किमत्र बहु
नो केने त्यन्वयः गत्यादिमु मतिसौंदर्यादिषु सं भाव्यमाना निजलेख भाषाणि पूर्वोदाहरणे द्वे उदस्के माह एतानीति कार्याणीत्य	ण्य
र्थः कलजेति तिरश्चापश्वादीनां चेतसि यदि लज्जास्यात्तदा चमयैः गोमृगाः पर्वतराजपुत्र्यास्तत्तत्र सारमणीयं केशपाशप्रमस्मीत्य
२ दापरभृतैः कोकिलैर्वाचं यच्छनीतित्तथा तस्यभावो मौनमेव व्रतं साध्यतां। अकठोरता मार्दवं हृदयन्ते यदितदाप्रसिद्धा मालतीदृ
२ षत्प्रायैच पाषाणतुल्यै वलक्ष्यतइति। कांतिर्दृष्टाचेत्तदाकमलालक्ष्मीः काषायनवस्त्रमालंबताआश्रयतु किमत्र बहु२

मुखेनेपुविदिता ख्याताः व्यासः [illegible] येषां ते व्यासप्रमुखा वसिष्ठाद्याः यस्य वाहनो वाहनौ अधिवाहः वाहनाधिरूढा भवंति पुरोगाग्रेस
पा र प्रमुखाः सुरासुरः सुरासुरःस्यमरः एवमपरंमुखनंदीत्तं लंबपणपट्टिका सर्पभूषणात् पुष्करमाला नं पुष्पवाटिका पुष्पस्रग्वीवंदनीयमा पास्ये
त्रे [illegible] दत्तप्रमुखोऽग्न्यादयः दिक्पाला शायी पालना धिष्ठिताः दिग्वस्त्रेन दिशामेव शाटी [illegible] पत्यात् मनोभूश्च दनतरुः चंदनस्थानी
यभस्मसंबंधित्वात् तत्र मदनेभस्मनौ शावे नागानामनुलेपनस्य पुराणेषु प्रसिद्धेः [illegible] लक्षणं संगमयति अत्रेति व्यवस्थितौ विवक्षायां स ग
चिने त्यो अथवा गम्याः व्यंग्याः [illegible] यन्तीति शिक्षणीय त्वेत्यर्थः आदिनापालोलगुप्ता त्वादिपरिग्रहः अभिहितमिति वाहनाधिरूढत्वादिना व्यासादिप्र
चिने तिपत्तौ समानविभक्तिके घटने व्यासादि [illegible] यत्नार्थस्य पतत्वगमादिति भावः साक्षादेव व्यासादिरि [illegible] य वाच्या कारणविभिति निर्दिष्टा रत्या शंक्याह पर्वतीति
यद्यप्युक्त विशेष्यविशेषण भावेनैव प्रतिपत्तिर्भवति तथापि स्फुट प्रतिपत्त्यर्थं तदेव परीत्यं कृतमित्यर्थः चक्रेति योदेवः स्वस्त्रीन चक्र
स्याभिधाते याऽप्रसभं आज्ञां तत्वेन राहुवधूजनस्य करतो लवं आलिंगनस्य उद्दामाउद्दायेविकौ सा स्तेर्ध्यं रहिते चुंबनमात्रशेषं चचका ला
रे सत्वयः विशेषणेन उक्त विशेषणविशिष्टेन एवं च ईदृशोदाहरणयोजने च अनुपपत्तिमिति गम्यस्य राहुशिरश्छेदस्य भंग्यंतरेणानभिधा
नाद्व्याप्तिमाशंक्य त्यथेः अभिधानायोगादिति अयमाशयः अत्र हि राहुशिरश्छेदकारी तिवासुदेव इति यो व्यंग्यं राहुवधूजन संबंधि
ताद्दशारतो ऽत्सवकारित्वेन प्रकारांतरेणाभिधीयत इति न वक्तुरा क्ये धर्मिणा वासुदेवस्य प्रकांतत्वेन यच्छ्रवाभिहिता त्वे न च पर्यायवाचिकानां व्यंग्य
स्य राहुशिरश्छेद कारित्वस्य वासुदेवत्वस्य वा धर्मस्य प्रकारांतरेणानभिधानात् तस्मात् वाच्य कोपादिहारणो गम्यमाक्षिप्तिवेतिलक्षणा
र्थे इति अभिधाने आक्षेपाव्यंजनं वा पर्यायोक्त पिनि कश्चित्पर्यायोक्त निपातस्य पुनः व्यंग्येनापलक्षितमित्युक्तमिति व्याख्यानं गंभीरतया भात

न विघ्न इति पत्त्वा [illegible] हितस्यापिभगवतो वासुदेवत्वादिनो रूपांतरेण व्यंग्यतयैव यथा श्रुते बाधकाभावादिति भावः न चाभिधाविषये कथं व्यंज
नेति वाच्यं वासुदेवत्वादिना प्रतीयमानेभगवत्यभिधाविषयत्वासंभवात् तस्याः स्वाबच्छेदकधर्मेणैव बोधकत्वात् अलङ्वो क्त गत्याद्यन न
रूपेणज्ञाते नो वति उक्तस्येति इत्यतु लक्षणानि त्यभावात्कुंजनोप गम्यत्वरीति नन्वनुप्रस्तुतेन ताद्दशारतोत्सवरूपेण कार्यप्रस्तुतस्यैव राहुशिरश्छे व
दरूप कारणस्य प्रतीयते चमत्कृति विशेषस्तस्या अलंकारत्वं गमयतितत्राऽप्रस्तुते व्यमानप्रस्तुतप्रशंसाया असंभवा दुक्तौ दृश्या
प्रयाया नरूपत येव स्वीकर्तव्यमित्याशंक्याह अत्रेति अलंकारणाभिमतानि यमाभावेन प्रस्तुतांकुरस्याप्यलंकारांतरत्वादेवं निश्चे
दृश्चारस्य [illegible] भगेन प्राचीन लक्षणव्याख्यानमयुक्तमिति भावः सत्यपलोसर्वेति मपिपर्यायोक्तविषयं विशदयति प्रस्तुतेनस्यादिना रू
पांतरेउपयात्वादिनेसती यथः यत्तुभगवद्रूपेणावागमनं विशेषणमपीदा लभ्यत्वेनासुंदरं नपर्यायोक्तस्य विषय इति तदपि चारुत्व रमणीयं
न हि पर्यायोक्तेः व्यंग्यसौंदर्यकृतो विच्छित्तिविशेषः किंतु भंग्यंतराभिधानकृत त्वात् व्यंग्यं तु भंग्यंतराभिधानेनासुंदरत्वेन प्रायशो दृश्यते
यथा रसोगं नत्वमिति विवक्षितेऽप्य [illegible] देशोलंकरणीयस्य फलतामुपनेत्व इत्यादावस्तस्तदसुंदरत्वा न वनमर्कोरेत्त कारमेवा अलंकार
४ स्यात्किं स्येस्वकारणं थै विरोधौ दोषनं तु तच्छिस्सा कारिपीप्रतिनशोभितेः उपजीव्यत्वो अवनमपि ग्रंथस्यात्किं चित्कारमेव चुक्ति विरोध इति परो
४ चित्कारमेवयुक्ति क्षेप सहितु समा त्रमुद्राव [illegible] लुरवामयोत्तीस्वलं विस्तरेण प्रकारांतरेण पर्यायोक्त लक्षयति पर्यायोक्तमिति रमणीयेन व्याजेन
निषेण स्वस्य परस्य वा इष्टस्य यत्साधनं संपादनं तदपि पर्यायोक्तं पर्याये व्याजरूपेण कंपनीति व्युत्पत्तेः संपादनेति संपा
दनरूपं यदिष्टं तत्साधनं तत्कारणमित्यर्थः देहीति पारिधानेन अध्यरवस्त्रेण निरहितं आच्छादितमित्यर्थः एवं च प्रकारद्वयेस ६

त्र

२ २५

२९

धारणं तदन्यतरत्वं सामान्यलक्षणं बोध्यं ॥ इत्यलंकारचंद्रिकायां पर्यायोक्तप्रकरणं ॥ उक्तिरिति अत्र निंदास्तुतिभ्यां इति स्तु-
तिनिंदयोरिति चेतरेतरयोगो न विवक्षितः तथा च निंदया स्तुतेः स्तुत्या च निंदायाः स्तुत्या स्तुतेश्चो[illegible] क्तेरभिव्यक्ति व्याजस्तुति-
रित्यर्थः प्रथमे व्याजेन स्तुतिरिति चरमयो व्याजरूपा स्तुतिरिति च व्युत्पत्तेः अत एव व्याजस्तुति पदार्थानुगमाभावात् निंदया
निंदाभिव्यक्ति व्याजनिंदाख्यमलंकारांतरमित्यपि पक्षे तेः एवमाद्य प्रकारद्वये स्तुतिनिंदयोः समानविषयत्वं भिन्नविषयत्वाभ्यां
प्रत्येकं द्वैविध्यमिति चत्वारो भेदाः अंत्ययोस्तु भिन्नविषयत्वे तिके एकएक एवेति पंच भेदाः लक्षणं तु व्याजनिंदाभिन्नत्वे स-
ति स्तुतिनिंदान्यतरपर्यवसायिस्तुतिनिंदान्यतरत्वं सर्वानुगतं बोध्यं ॥ कस्तव इति ॥ नृपचन्द्र कैश्चैतन्तिः त्वेपि[illegible] धुमकेसप्तिमश्वेमा ति
छिते आरूढ सति परिपंथिनः रात्रवः सप्ताश्च समारूढा भवंतीति अन्वयः सप्त सप्तयो अश्वा अस्येति सूर्यः सप्त च ते
सप्तयो अश्वास्तां समारूढा इति द्वितीयार्थी निंदा घोतकः खयासं मुरसाहलाः सूर्यमंडलं भित्वा दिवमुपगता इति स्तु-
त्यापर्यवसानं ॥ अर्धमिति ॥ शिवस्य देहार्धं दानवानां वैरिणा हरिणा अहृतं हरिहरात्मकस्यैकस्य विग्रहस्य प्रसिद्धेः एवं गि-
रिजया च वशिष्टार्धमाहृतं हे देव राजन् इत्थमुक्तप्रकारेण जगतीतले स्मरहरस्याभावे सनुमीलति त्रकाश-
माने संनिगंगा सागरं प्रस्थगमदित्याद्यन्वयः नामाधिपः शेषः स्मातलं पातालं स्वामिति पूर्वाद्धितः वेदुष्यादीतिः विहत्ता दिस्वर्थः आलितपः ली लादि परिग्रहः दारिद्र्यादी
स्यादिपदेन कुटुंबकात्यौदिय- त्या

२८ स्यस्थिरतालुता याः स्तुतिकायाः शयनमुपगतस्य रातद्वयमुक्तिः इदं विसिनीयमरचितं शयनेकी गोप्याः सं तां पश्य वदसुनुमापश्यति किं भूते पीनस्तनजघनसं पैर्भवने
गात्र भयत आयो योजगगयाः परिकृशाने तनोः कास्य मध्यस्य परिमितं नसंघंघमप्राप्य अंतमेध्यभागे हरितपर्णो एवं वदकृषेण शिथिलयोर्भुजयोः [illegible]
यस्तः विषमी कृतो न्यासो वैनायस्य तादृश्यामिति ॥ इत्यलंकारचंद्रिकायां प्रस्तुतांकुर प्रकरणं ॥ पर्यायोक्तमिति वचः प्रतिपादनं भंग्यंतरं अर्थ भंग्य
तरप्रकारके लक्षणं परिष्कुरुते यदुवेति तथा च विवक्षितस्य प्रकारस्य रक्ते न चारुतरेण रूपेण व्यंग्यस्याभिधानं पर्यायोक्तमिति लक्षणं पर्यायेण मंग्यंत-
रेणोक्तमभिहितं व्यंग्यं यत्रेति व्युत्पत्तेः लक्षणे रूपपदं व्यंग्यपरं न च व्यंग्यस्यैव वाच्यत्वं निष्फलं विरुद्धं चेति वाच्यं प्रकारभेदत्वात् दुक्तं मंमटभट्टैः यदेवो
व्यते तदेव व्यंग्यं यथा तु व्यंग्यं न तथोच्यत इति चारुतरेणेति विशेषणात् नमो राहुशिरश्छेदकारणे इत्यादौ न पर्यायोक्तप्र
दयु संगः स्वाधारणरूपेण वासुदेवत्वेन यत्तु राहुशिरश्छेदकारित्वरूपव्यंग्यमादायैव पर्यायोक्तं वक्तुमर्हं न तु विशेषण- धं तं
सामर्थ्य व्यंग्यं वासुदेवत्वमादायेति तदुक्तं राहुशिरश्छेदकारित्वस्य वाच्यसिद्ध्यांगत्वेन तेनापि व्यंग्यं विवक्षितं परधनमूतंवा
सुदेवत्वमादायैतत् स्थनाविलात् राहुस्त्रीकुचनैष्फल्यकारिणे हरयेन मर्स्य नतु राहुशिरश्छेदकारित्वमेव विवक्षितं व्यंग्यमिति युक्तं तदादाय प-
र्यायोक्तमिति विभावनीयं ॥ लोकमिति ॥ यस्याः क्षपा स्वाः चिरलोकं पश्यति अथ च सः लोकः यस्यां प्रतं जलेः शेषवलारस्यां चिरं न पश्यति
र स्तात्वातः ताभ्यां अक्षणदपतं जलिभ्यां अपरिच्छेद्या अनाकलनीयाः निर्वचतामितिन लं प्रतिदमयंत्या उक्तिः नवजलद दंमनः कर्णविलि
पकलिकायं डलाभिमानमयनवेतो[illegible] पादोक्तियैदूरयेतं प्रवासस्निधातुमिच्छति हं नखेद एतन्निने यतोपश्यतामित्यर्थः देवमिति देवतासार्व-
भौमे सकलदैवतानां धीश्वरं देवं दे की इदं जलधिरेव ऋस्थितं पंयस्य तथाभूतं त्रिपुरसेतारण रोकतस्य विष्णो रिग्धितां निस्थानत्वादः तथा
दे

स्तुतप्रशंसातो वैचित्र्यस्य विषय आलंमनप्रस्तुतो विशेष इत्यन्वयः अन्यथा। ततो वैचित्र्येपि तदंतर्भावांगीकारे। एवं चेति॥
अन्यगतस्तुतिनिंदाभ्यामन्यगतस्तुतिनिंदास्तुत्यभिव्यक्तयोर्व्याजस्तुतित्वसिद्धेश्चेत्यर्थः। प्रकृतरूपा प्रकारेण। शिख
रिणीति। नायिकाप्रतिनायकस्योक्तिः हे तरुणि असौ शुकबालकः नामवितर्के कुत्रचिदस्मिन् शिखरिणि पर्वते कियत्कालं चिरं
किमभिधानं किंनामकं तपः अकरोद्येन हेतुना तवाधरवत्पाटलं रक्तवर्णं बिंबफलं दशतीत्यन्वयः॥ इत्यलंकारचंद्रिका
३० यां व्याजस्तुतिप्रकरणं॥ श्रीः॥ व्याजनिंदां लक्षयति निंदायाइति यत्रान्यनिंदायाः अन्यस्य निंदाया अभिव्यक्तिः पर्यव
स्यति सा व्याजनिंदा इतरनिंदाव्याजेन निंदेति व्युत्पत्तेः विधेइति हे विधे ब्रह्मन् सा कुपूर्वं तत्त्वैकमेव शिरोयः अहन्नत अछि
न्नत स एवापूर्ति हरो निंद्य इत्यन्वयः निंदयेत्यभिव्यंग्येत्यनेनान्वितं निंदयाभिव्यंग्या विधेर्निंदा व्याजनिंदेत्यन्वयः विषमिति
ध्वनिं पाके दारुणे दुःखकरे टेकाकलरटरटनं कुरूपो सो विधिः आम्रवृक्षस्सरलेन सौम्येन कोकिलेन सहवासं तव वचकारेत्यन्वयः। ननु केन
चिदलंकारिकेणानुक्तायाव्याजनिंदायाः कथमलंकारत्वेन नांगीकरणमित्याशंक्याह। प्रतिवदीति। तुल्ययुक्त्या प्रतिवं
दीस्थानीयेत्यर्थः तथा च स्तुतिवन्निंदायामप्यप्रस्तुतप्रशंसातो वैचित्र्यविशेषात्तदनंतर्गर्भाव व्याजस्तुतौ चापर्यनु
गमाभावादनंतर्भविष्यदलंकारतायाओचित्यापातत्वात्प्राचीनैरनुक्तापि स्वीकर्तुमुचितेत्याशयः। प्रागुक्तयोरेकः

४ परिणामं। विधिरेवेति। विशेषतो गर्हणीयः निंदनीयः

स्तुतीशकुंतेष्वित्याबद्धकृत्रिमेत्यनयोरप्रस्तुतप्रशंसोदाहरणत्वासंगतिमाश्रित्य शंकते नन्विति कोडीकारः स्वविषयी
करणं अन्यत्र लब्धात्मकस्यालंकारद्वयस्य कचित्संकरोपि न दोष इत्याशयेन समाधत्ते। यत्रेति। एतत्त्व इत्यादावित्यनेना
न्वितं अस्या अप्रस्तुतप्रशंसाया। सैव अप्रस्तुतप्रशंसैव। लावण्येति इमां तन्वीं तन्वता सृजता वेधसा चेतसि कोर्थः कामना
विषयभूतः विनिहितः अभिसंहितः किं प्रयोजनमुद्दिश्येयं निर्मितेत्यर्थः। नन्वनायासेनातिसुंदरतन्वीनिष्पत्तिरेव प्रयोज
नं तदभावेपि वा लीलामात्रेण तन्निर्माणं स्यादत आह। लावण्येत्यादि यतो लावण्यरूपस्य द्रविणस्य धनस्य व्ययो न गणितः
महान्क्लेशो जितः कृतः स्वेच्छाचारिणो जनस्य उदासीनेस्यापि हृदये चिंताज्वरो निर्मितः एषापि वराकी दीना स्वगुणानुरूपस्य
२५ वरस्याभावाद्धतेव हता नष्टेव प्रायातथा च बकौयासस्साध्यत्वादनिष्टानुबंधित्वाच्च नतन्व्याः प्रयोजनत्वं नापि लीलामात्रेण तन्नि
र्माणं च संभवतीतिभावः। तन्निंदाव्याजेन तरुणीनिंदाव्याजेन तत्सौंदर्यप्रशंसा शब्दार्थचमत्कारातिशयप्रशंसायां पर्यव
स्यतीत्यन्वयः। तन्निंदाव्याजेन स्वकवितानिंदाव्याजेन कवितासौंदर्यरूपा प्रस्तुतार्थस्यात्यंतमस्फुटत्वात्कथमस्य
पद्यस्य तत्परत्वमित्याशंकामपनेतुं भूमिकामारचयति। अस्येत्यादि। रसानुगुणत्वादितिवीतरागेशृंगार
स्यासंभवादितिभावः ननु शृंगारासंभवेपि तन्वीनिर्माणनिंदया शांतरसापरिपोषादेत्यनरसानुगुणत्वमत आह। वीतरागेति।

ह्या   न

नष्टाछाया

रूप्यनिबंधनप्रस्तुतवाक्यार्थावगतिपरिग्रहः। अत्रापि ललितालंकारेपि। वर्णनारूपस्येति। चमत्कारितारूपायाः
विच्छित्तेस्तदवच्छेदकवर्णनारूपत्वमित्यभिप्रायः। कस्यचिन्नेत्रद्वंद्वादेः स्ववाचकनेत्रादिपदेनानिर्दिष्ट

त्यान्यानभिभवंतीति सामान्येन पूर्वोक्तविशेषसमर्थनं। अत्रापि दृत्तदाकांक्षायां विशेषरूपमर्थांतरं न्यस्यति। स
नेपालभूमिपालस्य भालपट्टितिलके कस्तूरिकाकानवांकिता पितु सवइति। मालिन्यमिति। मधुलिट् भ्रमरः। क
लंकश्चैतौ अजन्नशशिनो मालिन्यधर्मं कुरुतः। तव मुखे तु दृक् च तिलकाञ्जनं च। तयोराभांशोभा धत्त
इत्यनुषज्यते। अंजनाभे इति पाठः। द्वितीयाद्विवचनं। युक्तमर्थं सामान्येन समर्थयति। दोषावपि क्वचिन्मे
लकतो मिथा मिलना ङ्गुगणत्वइतः प्राप्नुत इति। कथमेतत्तत्राह। हियतः वक्तुर्वचसि नभाविप्रलंभो भ्रांति
प्रतारणे गुणो भवतः। घटवति घटाभावनिर्णये परप्रतारणाय घटोस्तीति प्रयुक्ते वाक्ये प्रमाजनकत्वात्तयो गुण
त्वमिति भावः। इति विकस्वरालंकारः। ६२। प्रौढोक्तिरिति। उत्कर्षस्याहेतावुत्कर्षहेतुकत्वकल्पनं प्रौढोक्तिः।
कलिंदजा यमुना। स्तोमः समूहः। मेचकाः श्यामाः। रोहणं उद्भवं नैकल्पितं। एषु राजा कल्पवृक्षादीनां क्र
मेण रजो भरादिभिः पंचभिर्भूतैः रचित इत्यन्वयः। धनदः कुबेरः। शंखो निधिविशेषः। राजो भरः पराग
भैः

नंदनिदेशतः १

प्रेषिता। ससंकल्पां मनोरथसहितां। मेघैरिति। मेदुरं तुंदिलं। नक्तं रात्रिरस्तीति शेषः। नंदस्याज्ञावशात्। प्रत्यध्वकुं
जद्रुमं। अध्वसंबंधिकुंजद्रुमप्रति। ग्रंथकारेण गीतगोविंदकृता। चातकइति। यत्तु चातकस्य त्रिचतुरकणमात्रार्थि
याजलदकर्तृकेण। अंभसा विश्वपूरणेन हर्षाधिक्याभावादयुक्तमुदाहरणमिति। तं तुच्छं। हेतुत्वसिद्धेः। नहि क्षुदु
पशमाय तत्स्वल्पान्नमात्रार्थिनः स्तदधिकान्नलाभे हर्षाधिक्यं नास्तीति वक्तुं शक्यं। तदानीमुपयोगाभावेपि स्व
स्यैव कालांतरेपि तदुपयोगात्। नच चातकस्य जलसंग्रहानुपयोगाद्वैषम्यं शंकनीयं। चातकवृत्तांतस्याप्रस्तुत
तया तद्व्यंग्य प्रस्तुतहालयाचकवृत्तांते काव्यस्य पर्यवसानादिति। तृतीयभेदमाह। यत्नादिति। प्रहर्षणमित्य
नुवर्तते। निध्यंजनेति। निधिदर्शनसाधनं यदंजनं तत्साधनौषधीमूलमित्यर्थः। साधिता। लब्धः। वृक्षस्येति।
अधःस्थितं मिति पाठे समीपाशोकयष्टावविस्थितमित्यर्थः।। स्थिताः। आश्रिताः विटपाः शाखा येनेति पुष्पाद्य
विशेषणं। अदधात्। आहितवती। यष्टिः स्कंधः। तेन पादाघातेन पुनरप्यामूलपुष्पिताभूत्। अर्थात्। अशोकय
ष्टिः। अत्र च तदसाध्यकार्यलाभात्तल्लाभइति प्रकारत्रयसाधारणं सामान्यलक्षणं बोध्यं।। इति प्रहर्षणालंकारः।। ६७

२ वृक्षस्याधोदेशेस्थितं। अवस्थित २

इष्यमाणेति। इष्यमाणविरुद्धोयोर्थः तत्संप्राप्ति विषादनामालंकारः। उद्योजयेत्। उद्दीप्तं कुर्यात्। उद्योजयेद्यावदि
त्यनेन तादिच्छामात्रं न तु तत्करणमिति विषमाद्भेदः। एवमग्रिमोदाहरणेपि इच्छामात्रं न तु इष्टोत्पत्त्यनुकूलाचरणमि
ति।। इति विषादनालंकारः। ६८। एकस्येति। एकस्य गुणदोषाभ्यां अन्यस्य गुणदोषौ यदि भवतः ते दोल्लासालंका तौ
रः। अपीति। अपिः संभावनायां। साध्वी पतिव्रता। स्नात्वा मां पावयेदिति जान्हवी इच्छतीत्यन्वयः। तवधाटीषु प्रस
यात्रासु कुचयोः काठिण्यं पादपभयोः स्पष्टमिष्टं स्यादिति योजना। लाभायमिति। भूपालसेवकानामयमेव लाभो
यद्विधो न भवतीत्यन्वयः। यदयमिति। रथस्य संक्षोभाच्चलनाद्यदयमंसासनार्थाद्दयितांह्निपीडितस्सघृ या
ष्टः भमांगेषु मध्ये स एवैकः कृतीकुशलः। अवशिष्टमंगमेभारमात्रमित्यर्थः। दुर्वर्णैः दुष्टवर्णभिः। दुष्कुलैः
श्वेत्यादिश्लेषो बोध्यः। वननाशरूपः। वनस्येति युक्ततरः पाठः। तत्र निक्षेपोभ्रमरनिरासः। गजस्य दोषत्वे नेति सं
बंधः। आघ्रातमिति। मरुः परिलीढं आस्वादितं। नीरसेन मनसा काठिण्यशीलेन वानरेण कर्त्रा तत्र तस्मिन्नसति विचार
णे। व्यसननिनाद विचारेण तत्परेण। अश्मनापाषाणेन। प्रथमचतुर्थयोः गुणेन गुणो दोषेण वा गुण इति भेदयोः उ

२ वनसंबंधानाशरूपः

ल्लासः उल्लासशब्दः अन्वर्थ इति। उत्कर्षोल्लासः। सुखं यत्रेत्यर्थानुगत इत्यर्थः। छत्रिन्यायेति। केचिच्छत्रसंबंधाच्छत्र्यच्छ
त्रिसमुदाये छत्रिणो यातीति वदंतीत्यर्थः॥ इत्युल्लासालंकारः॥ ६९॥ प्रस्थेति। प्रस्थपरिमाणं कर्षपात्रं॥ मदुक्तिरिति। ममो
क्तिः कविता। सुधियोऽन्तःकरणं सुधीभूय अमृतीभूय चेन्मदयति तोषयति तदास्याः मदुक्तेः। अरसानां नीरसानां
पुरुषाणामनादरसमूहैः किन्नाम स्यान्न किंचिदित्यर्थः। क्वचिद्दलसेतिपाठः। परमरमणीयापि केवलरमणीया स्त्री
यूनः तरुणस्यापि यथांतःकरणहरणं कुरुते तद्वत्कुमाराणामित्यर्थः। त्वं चेति॥ शिवं प्रति कवेरुक्तिः। जलाशं च इंगप न्वयः
क्षे जडाशं अंबुजबांधवः सूर्यः। उल्लासरूपगुणाभावः॥ इत्यवज्ञालंकारः। ७०॥ अभ्यर्थनाइच्छा। तत्र दोष एव। दोषस्येति
अनुज्ञेति लक्ष्यनिर्देशः। शश्वदिति। निरंतरं संकीर्त्यत इत्यनेनान्वयी॥ मय्येवेति। जीर्णतां प्रत्युपकाराक्षमतां। हरि
शब्दो वानरार्थः। व्यतिरेकमुखेति। वैधर्म्यमुखेत्यर्थः। अस्य च अर्थांतरन्यासेनेत्यनेनान्वयः। दर्शितेति। वैष ध
म्यविपर्यये प्रत्युपकारानभिलाषी विपत्तिं नाकांक्षतीत्यर्थपर्यवसानादिति भावः। भजेमेति। हे शैलनाथ। हरपैशाचि मथ
कां पिशाचसंबंधिनी प्रकृतिं पिशाचतामेत्य प्राप्य भवतोंतिके समीपदेशे भजेम। अमरसंपत्तीः किमिति प्रार्थयामहे।

१ अतिशयोक्तिरस्तीति १ स्वा ध

त्वात्। अप्रतिपादितत्वात्रो अतिशयोक्तिरस्तीतीत्यर्थः। तत्प्रसंगात्। संबोध्यौ शौरि इयत्तयोरन्यतरसंबंधेपि संबंधव त्वो
र्णनादति शयोक्तिमात्रप्रसंगात्। अलंकारांतरं कस्तर्हि इत्यादौ अप्रस्तुतप्रशंसा। प्रकृतं तु ललितमिति। विषमालंका
रेति। स्वमतिसूर्यवंशयोरत्यंतानुरूपत्वरूपेत्यर्थः। तात्पर्यस्य तादृशमतिकरणकस्य वंशवर्णनेच्छाभिप्रायस्य।
अनायीति। नूतनमिदमयं त्वाः उक्तिः। हे नलत्वया कुमोदनाः वसंत मुक्तस्य वनस्य दशामनायि प्रापिताः। त्वया
पितास्तैर्वसंते संकेततया कृतार्था संज्ञानामपि। अनेन। मल्लक्षणेन जनेन न श्राव्या श्रवणा हा। अपिलवेति। अ
त्र चतादृशावनदशारूपस्याप्रस्तुतार्थस्य प्रस्तुतदेशे कथना प्रस्तुतवृत्तांतस्योक्तरूपस्य प्रतीतेः। न चात्र वारणेंद्र
दर्शना लीलामिति वसदार्थनियुक्तेति च वाच्यं। तत्र पूर्वार्धे न प्रस्तुतवृत्तांतोपादानेन सादृश्यपर्यवसानरूपनिदर्शनास
त्वेपि अत्र तदनुपादानेन तच्छायता रूपा विच्छित्तिविशेषवत्त्वेन ललितालंकारस्यैवोचितत्वात्। एतेन दशापदल
क्षितनिःश्रीकत्वरूपकार्यद्वारेण कारणस्य राजकर्तृकत्यागकर्मत्वस्याभिधानात्पर्यायोक्तमित्यपि निरस्तं॥ उप
धेयसंकरेप्युपाधेरसंकराच्चेति संक्षेपः॥ इति ललितालंकारः॥ ७१॥ तामेवेति। दूतिकामेवेत्यर्थः॥ निसृष्टा।

यतो मघवदादिभिरिंद्रप्रभृतिभिरपि भवद्भवनदेहलीषु विकटलुंडस्य वक्रलुंडस्य दंडाघातैः स्फुटन्मुकुटा
ग्रैः भूयत इत्यर्थः॥ ॥इत्यनुज्ञालंकारः॥७१॥ लेशाद् इति लक्ष्यनिर्देशः। प्रवसतीति सप्तम्यंतं शुकस्य निं
दायां। निंदाव्याजेन स्तुतौ वेत्यन्वयः। संल इति। सच्चरितस्योदयो वृद्धिः। तद्ध्वसनिनः तत्परः। प्रादुर्भवद्वं
त्रणं। स्वेच्छाचारनिरोधो येषां ते। सर्वत्राविषये। दुःखमिति क्रियाविशेषणं। अनिपुणमतिः अव्युत्पन्नम
तिः। सतां समीचीनेन कृतेनाचरणेन। प्राकृतो नीचः। युवेष इति। वरार्थिनीं कन्यकां प्रति सखीवचनं॥ चपल
का इत्यादिना च नायिकायाः सखीं प्रति। उत्सेक इति पाठे स्य कर्ष एवार्थः। कन्याया दोषत्वेनाभासतामित्यन्व
यः॥ निवर्तितुमिच्छा निर्विवर्तिषा। तद्रूपदोषत्वेनेत्यर्थः॥ निर्विवृत्सो इति पाठे राज्ञो विशेषणं। कृतस्त्वद्गु
णत्वेन वर्णनं तत्राह। राजकोपेति। अन्येनाविदितं यथा स्यादिति क्रियाविशेषणं। लेश एवेति। तदुक्तं दंडिने
वाच्लेशमेके विदुर्निंदां स्तुतिं वा लेशतः कृतामिति। लेशाभासत्वस्येति काव्यार्थकं। उदाहरणयोरखिलेष्विव घस्याघोः
भिन्नविषयेति। अन्यनिंदयाऽन्यस्तुतिरन्यस्तुत्यान्यनिंदेत्येवमादिरूपा। तथाप्येकविषयाव्याजस्तुतिर्न लेशादि
इत्यर्थः

घोत्ते त्याशंक्याह। विषयैक्येपीति। लेशस्य वर्णनादित्यग्रेतनेनान्वयः। इंदो शिति। हे उर्वीवलयतिलकरूपराजन्त्वदीये
यशोभिः किंधवलितं तत्तद्वद। यतोऽद्यापि इंदुलक्ष्म्यादीनि। श्यामलिम्ना श्यामवर्णेनानुलिप्तान्याभासंत इत्यन्वयः। ल
क्ष्मलांछनं। दिग्नागानां दिग्गजानां मदजलमेव मषीकृताभिन्नगुणरूपमालंबनं सर्वदेति। अरयः पृष्ठमूर्धानं लेभिरे। बे
न शत्रवः पलायनाभावात्। दीनाराः परिमाणविशेषपरिच्छिन्नाः सुवर्णमुद्रा। एवं च लेशव्याजस्तुत्योः संकीर्णविषयत्वे
च गुणदोषीकरणादिकमिति। आदिपदाद्दोषगुणीकरणपरिग्रहः। वैचित्र्यापकर्षात्तत्रेतिपाठो युक्ततरः। अत्रेत्यपि युक्तम्। येप्विसु
वा इदमोपित्तच्छद्यार्थपरामर्शकत्वात्। इति लेशालंकारः। ७२। ।। सूच्यार्थेति सूचनीयस्यार्थस्येत्यर्थः। मुद्रेति लक्ष्यनि
देशाः। दृग्युग्मं विपुलं यस्याः सा। अत्र ग्रंथे। अस्मिन्नलंकारग्रंथे रत्नमालाशब्देन भगवत्स्तुतिपद्यावलीविशेषरूच्य
ते। रत्नानां मणिनिवेशो न प्रकृतार्थपरः रत्नवाचिपदघटितेन तत्तन्नामकजातिसूचनं। नक्षत्रमालाशब्दार्थोपि पूर्वोक्तए
तेरत्नानां मणिनिवेशो न प्रकृतार्थपरः रत्नवाचिपदघटितेन तत्तन्नामकजातिसूचनं
वा। अग्न्यादिदेवतानामभिर्नक्षत्राणां तद्देवत्यानां सूचनं बोध्यं। वक्ष्यमाणेति। यथा अनर्घ्यराघवे यांतिन्यायप्रव
तस्यपत्तिर्यचोपि सहायतां। अपंथानं तु गच्छंतं सोदरोपि विमुंचतीति सूत्रधारपरेण वक्ष्यमाणश्रीरामरावणवृत्तां
सूचन तैमिति बोध्यं। इति मुद्रालंकारः। ७३। क्रमिकमिति। प्रकृतार्थानां क्रमिकं प्रसिद्धक्रमानुसारिन्यसनं तत्रेतिपा

तत्तन्नामप्रवृत्तिनिमित्तरत्नसूचनं

दन्तं रत्नावत्स्यालंकारः। अक्षतत्वं च यथा कथंचिदप्रकृतिसंबंधित्वं बोध्यं। चतुरेति। चतुरमास्यं यस्य सः चतुर्मुखः श्व। रत्या सहेति।
हे बाले भवत्यास्तने श्रीरमणस्य विष्णोरवतारदशकमालोक्य चयः। कीदृशे। रत्नावासप्रासप्रियस्य लाञ्छनचिह्नं नखक्षताग
रागादिकं येन तथाभूते कठिणतायाः आवासे। स्थानभूते। रसेनालिंगिते। प्रकृष्टाह्लादे। एकरसे तत्परे। क्रमाद्वर्धदशमलक्षा
दिपरिमाणलाभेनोपचिते। अवस्थे भूष्टतापर्वतानां गुरुत्वं मर्दनेनाम्नायनितादृशे ततोपि महत्वात्। चक्रवाकस्पर्धिनी
ले। तत्सदृशत्वात्। भोगः सुखं शरीरं वा तद्भ्राजि। जनितमदने। खेष्विंद्रियेषु लीनाः आसक्ताः उन्मुखाः यस्मिंस्तादृशे।
एतैरेव विशेषणैः अवतारदशकरूपतापि स्तनयोर्बोध्या। तद्यथा। रत्याः आसः प्रियः कामः तस्य लाञ्छनं मत्स्यः तद्रूपे
कठिणतायाः आवासे कूर्मे। रसायाः पृथिव्याः स्वोद्धरणकाले आलिंगिते वराहे। प्रह्लादे एकोरसः प्रीतिर्यस्य तस्मिन्नृ
सिंहे। क्रमः पादविक्षेपः। तदनुसारेणोपचिते अवस्थे वामने। भूष्टतां राज्ञां गर्वनाशके भार्गवे। कोकस्पर्धिनि। त्रीता वियो
त गातुर्या च चक्रवाकत्वापदेशा रामे। भोगः फणा तद्भाजि शेषावतारे बलभद्रे। जनितमनंगं अंगस्य शरीरस्य विरुद्ध
मौनभोगत्यागसमाधिप्रभृतिर्येन तस्मिन्बुद्धे। खलीनमश्वस्य वल्गा तद्दुन्मुखे। कल्किनीति। क्रमानुसरणे पीति।
तथा च प्रसिद्धयसहयोगिनामर्थानामन्य सनं रत्नावलेरिति सामान्यलक्षणं॥ सक्रमत्वाक्रमत्वे तत्प्रभेदाविति भावः॥

।त्वो

यस्य प्रतापः। निहतानां प्रतिसमतानां अंतःपुरे पंचमहाभूतमयो मूर्त इव दृश्यतेत्यन्वयः॥ पंचमहाभूतमयत्वमेवाविशेषेण द कणे
र्शयति। वह्निमयः अंगेषु क्षमामयः पृथ्वीमयः पीडाभरसहिष्णुत्वात्। स्वांतेष्वंतःकरणेषु आकाशमयः। तेषां शून्यताश्रयत्वा
त्। यथा यथैचित्रे दिग्यस्य प्रपंचनप्रकृतोऽत्र मानेत्यादि। उपमानं च उपरंजकं च उपमानोपरंजके तद्भावस्तत्ता। तदुक्तं। उपर
ंजकतामेति विषयी रूपकं तदेति। तत्रोपमानता रविरिव प्रादेति वसापजायमानोदय इत्यादिवत्। उपरंजकता चन्द्रोऽस्य इत्या
द्योदाहरणे वह्निमय इत्यादि प्रतापवर्णने च स्पष्टेति॥ प्रकृतान्वयं विनेति॥ मित्रचंद्रमुखी बाला लोहिताधरपल्लवस्यो दोवि
तिभावः। क्रमिकेष्वुपलक्षणं। तदभावेपि गुरूणां जघनेनेषां तरुणी मंदगामीत्यादावपि अलंकार इति बोध्यं॥ इति रत्नावल्य यम ६
लंकारः ७४। तद्गुण इति। स्वगुणत्यागादनंतरं अन्यदीयग्रहणं तद्गुणालंकारः। पद्मेति। तव नासामौक्तिकं अधरकांत्या पद्म
रागवदाचरतीत्यर्थः। वीरेति। हे वीर त्वदरिकामिनी। वनभुवि परिधानं कलं पल्लवानि करेण संस्पृश्य पांडुपुत्रबुध्या नेकरोति।
नग्नत्वाति। कीदृशानि निजकररुहाणां नखानां रुच्या श्वेतकांत्या रवचितानि व्याप्तानीत्यर्थः॥ इति तद्गुणालंकारः ७५॥
पुनरिति। स्वगुणत्यागानंतरं पुनः स्वगुणप्राप्तिः पूर्वरूपमलंकारः। हरेति। नीलो पीति युक्तः पाठः। भिन्नेति। माघे रैवतक
गिरिवर्णनमिदं। गरुडाग्रजेनारुणेन। विभिन्नवर्णाः मिश्रितवर्णाः सूर्यस्य रथ्याः अश्वाः। यत्र गिरौ। वंशांकुरवत् नीलैः

रत्नैः परितः स्फुरंत्याः रुचास्वांरुचं नीलद्युतिमाप्निविरे। आनीतवंतः रुचाविभिन्नवर्णाः इतिवान्वयः। केचिदित्यस्वरत्नबीजं
तु प्रभरागायतद्रूत्युदाहरणे तद्गुणालंकारो न स्यात्। न चेष्टापत्तिः। अनुभवसिद्धचमत्कारस्य। निरालंबनत्वापत्तेरित्यूह
नीयं॥ अथवाऽयं तद्गुण एवेत्येवकारक्रमभंगेन काव्यप्रकाशकारादिगतोपन्यासपरत्वेन व्याख्येयं॥ तैरत्र लक्षणं स्याद्गदाह
तत्वात्। अत्र हि पूर्वं अश्वानामरुणगुणत्वं अनंतर रैवतकरत्नैः उभयेषां तद्गुणत्वमिति तद्गुणद्वयमिति तेषां अभिमतो पू
र्वैति। वस्तुनि विकृति विगतेऽसत्यपि पूर्वावस्थायाऽनुवृत्तिरपि पूर्वरूपमलंकारः। मलः प्रकोपः। हारमिति। हे राजन् तव गंडका
विद्विषां मंदिरेष्वन्येपि चिरंतनः पुणयोयस्याः सैव राज्यस्थितिर्मर्यादा थस्त्रीलिंगोषु। यतोहारखड्गिभिः खड्गाख्यपशुभि
रैव खड्गधारिभिरावृतं। बहिरपि भूमयः मदभ्रास्विन्नगंडे गजेरध्यासिताः। अंतःपुरभूमयः। विलसन्मदधारि
भिः कंचुकीभिः सर्पैरेव सौविदल्लैः रध्यासिताः। शायनंतत्वं महिषीभिर्वनिताभिरिव महिषस्त्रीभिराक्रांतमित्य माडुः
संगतः न्वयः॥ इति पूर्वालंकारः॥ ७६॥ संगतेनेति। स्वसंबंधयोग्यः पदार्थः तद्गुणानंगीकार मतद्गुणालंकारः। चिरमिति। रा
गिणी। अनुरागिणी। मंजिष्ठाद्यं जम्बु व्ययुक्ते च। नाहितो त्वं रज्यसि रक्तोऽनुरक्तश्च न भवसीति श्लिष्टं। गंडेति। हे श्री
मन्नृसिंहाख्य भूपते एषा तव कीर्तिः मदैः पिच्छलेप किल्लेति दिग्गजानां गंडभूदेशेयद्यपि विहरंति। तथापि वैरिस्त्रीणां नय

न्वयः। तत्प्रतिबिंबानां च व्यक्त्यंतरतया भानमस्त्येवेत्यनुषंगः। केचिदित्यस्याहुरित्यग्रेतनेनान्वयः। केचित्प्राभाकराद
यः। तदुक्तं। समेनैव वस्तुनांऽन्यलक्ष्मणा यत्स्वं वस्तुना यन्निगूह्यते। निजेनागंतुना वापि तन्मीलितमिति स्मृतमिति।
तयोर्मध्ये। एवं चेत्यस्य मीलितालंकार इत्यग्रेतनेनान्वयः। अपांगेति। अपांगः तरलायतयोस्ते तरलाः सत्वरोद्घा
रणात्। चक्रीवक्रोक्तिगर्भा वर्णायासुताः गिरो वाक्यरूपाः इतिप्रकारेण मृगदृशां मंगलीकय स्वतस्फुरितत्रैक स्वभावाख्य
त्रांग टीभूतं तत्तस्मादेकैकरूपं पदः हृतस्थितिः। भेदाध्यवसायेपीति। मुखपद्मयोर्भेदाध्यवसायेपीत्यर्थः। व्यावर्तका भा
स्फुरणेन हेतुना अलंकारांतरेणेति। स्वरूपतिरोधानेन मीलितासंभवात्। भेदतिरोधाने न सामान्यस्याप्यसंभवादि
तिभावः। सामान्येति। तथा च गुणसाम्याद्विशेषाग्रह इति सामान्यालंकारसामान्यलक्षणं बोध्यं। विशेषाग्रह इत्युक्ते
चिद्भेदे गृह्यमाणे क्वचिच्चागृह्यमाण इत्याद्यप्रकारांतरं गलितत्रस्यात्तन्मते स्यादिति भावः। अवांतरभेदन्वेषन
तरभाव्यमित्यनुषज्यते। पूर्वस्मिन्निति। मीलितं यदि सादृश्यादित्यादिपूर्वोक्तचंद्रालोकलक्षणमते इत्यर्थः। स्वरूप
तिरोधाने। अपांगतरलद्दू इत्यादिस्थ स्वरूपतिरोधानस्थले। अलंकारांतरं स्यादि। स्वरूपतो ज्ञायमाने सादृश्याद्भे

दाग्रहणं मीलितमित्यंगीकारे प्रथमः पक्षः। सादृश्याद्भेदाग्रहणमित्येतावन्मात्रं मीलितालंकारलक्षणमित्यंगीका
रे प्रथमः पक्षस्तु द्वितीय इति भावः। इति सामान्यालंकारः॥ ८०॥ भेदेति। वैशिष्ट्यं वैजात्यं। उन्मीलितविशेषक
श्चेति क्रमेणालंकारौ। भग्नभेदाग्रहात्तदंतर्गता लक्षितानीति। संकुचितत्वादिति भावः। सामान्यरीत्या
सामान्यालंकारन्यायेन। एवं च वेत्रत्वचा तुल्यरुचा वधूनां कर्णाग्रतो गंडतलागतानि। भृंगाः सहेल
न्यादि नापतिष्यन्को वेदयिष्यन्नवचंपकानि इत्यपि विशेषोदाहरणं बोध्यं। यत्तु अनुमानालंका
रेणैव गतार्थत्वान्नानयोरलंकारांतरत्वमपीति। तदयुक्तं उदाहृतस्थले भेदविशेषस्फूर्त्या विशेष
दर्शनहेतुकप्रत्यक्षरूपत्वात्। तथापि स्वकपोलकल्पितपरिभाषालंकारतां ब्रूषे तथापि सादृ
श्यमहिम्ना प्रागनवगतयोर्भेदवैजात्ययोः स्फुरणात्मना विशेषाकारेण मीलितसामान्यप्र
तिद्वंद्विनायुक्तमेवालंकारांतरत्वं। अतद्गुणावज्ञयोरिव विरोधोक्त्यलंकारादिसलं विस्तरेणान्न

स्यादिति। नृत्यं कुर्वतो भर्गस्य हरस्य योट्टहासः तत्र सरस्य सभूहस्य विस्तारस्य वासहृच्चैरेसदृशौ रित्य
र्थः। कीदृक्। कीर्तिविच्छुकूः। एषः कमलाकामुकः। नाभिकमलपरिमलस्य घ्रोटिं सम्यां धियदिनासादयि
ष्यत्। नाधारइष्यदित्यन्वयः। यत्तु तद्गुणस्यात्र निबंधितात्कथं तस्य तिद्धिदिस्वेउन्मीलितस्येति तदुक्तो
मात्र पालंभत्वादुपेक्ष्यं॥ तद्गुणेन भेदान ध्या।चूसार्ये स्यात्कृत्वात्। वाराणसीति। लांछनेत तृतीयलोचना
दिचिह्ने साधारणे पिसतीत्यन्वयः। पार्थो ऽर्जुनः तेन कृताय: प्रहारः तेन व्रणायत्र ताद्दृशमुत्तमांगं
शिरः पूर्वत्र स्वाभाविकगुणसाम्यं। इहत्वागंतुकगुणसाम्यमितिभेदः॥ इत्युन्मीलितविशेषालंकारो॥
किंचिदपि ॥८२॥ किंचिदभिप्रायसहितं गूढमुत्तरमुत्तरनामालंकारः। वेतसीवेतसलता। सुखेन तत्तुयोग्या
सुतरां। ग्रामे इति प्रस्तरप्रायें पाषाणबकुले। पाषाणतुल्ये च। प्रायोबाकुल्यतुल्ययोरिति कोशा
त्। किंचिदास्तरणादिकसमागमप्रतिबंधश्च। पयोधरो मेघः स्तनश्च। कश्चिदचगमिष्यतीज्ञा

न कुंसुमैकज्जा केषु स्थितान्यंजनानि भ्रमार्प्रिप्रो छतिा तदपि तथापि। दृक्षु। हिमकरस्य चंद्रस्य यत्किरणाद्वैतं तस्य सो
वस्तकी स्वस्ती त्याहेत्यर्थतदाहेति मात्राब्दादिभ्यः छगवाच्य इत्यनेन ठक्। प्रत्ययः। तादृशीतियावत्। स्फुरतिप्र
काशत इत्यर्थः। विशेषाकारेणेति। प्राक्लक्षित्त विशेषेणेत्यर्थः॥ इत्यतद्गुणालंकारः॥ ७७॥ प्रागिति। पूरसन्नि
धिवशात्पूर्वसिद्धस्यस्व गुणस्योत्कर्षः। अनुगुणानामालंकारः॥ नीलोत्पलानि कर्णावतंसीकृतानि। कृपिरिति
कापिवायनेमद्य॥ इत्यनुगुणालंकारः॥ ७८ ॥ मीलितमिति। लक्ष्यनिर्देशः। सद्गति। स्वभावरक्ते चरणे लाक्षा
याः रसो नालक्षि न ज्ञातः। मल्लिकेति। क्षौमं दुकूलं तरुण्यः। इतिमीलितालंकारः॥ ७९ ॥ सामान्यमि रूपे
ति लक्ष्यनिर्देशः। विशेषो व्यावर्तकधर्मः। पद्मानामाकरः। वालिसूनुना अंगदेन। एकेन। चरणज्योत्स्नादि पद्माकरः
ना। अपरस्य लाक्षारसाभिसारकादेः। भिन्नरूपेति। मुखपद्म। वेस्वंतरदेभिन्नस्य स्वरूपस्यावभासेपीत्य
र्थः। उक्तमेवार्थमुदाहरणारूढतया विशदयति। मीलितोदाहरणे हीत्यादिना। वस्त्वंतरत्वेन न भासत इत्य

रा दृबिंदुनाप्रबंधै धौ॑रिभिः कंठेभिन्नंलग्नं कुंकुमंदृष्ट्वा कापिवयस्यासखी स्मित्वास्मितं कृत्वा पुंस्त्वं व्यंजयंतीतिसंं
तन्व्योः पाणौ रचकुंलेखां लिलिखेत्यन्वयः। सूक्ष्मालंकारपराभिप्राय मवगत्यसाकूतं चेष्टितेनोत्तरसमर्पणं। पिहि ता
तालंकारेतु गूढं पुरवृत्तांतं ज्ञात्वासाकूतचेष्टयातस्प्रकाशनमितिभेदोबोध्यः। इतिपिहितालंकारः ॥८५॥ व्याजोक्ति
रितिलक्ष्यनिर्देशः। चौर्यवृत्तेकृतं यत्संकेतभूतभूमिपृष्ठलुंठनमित्यन्वयः। उपपतिनाजारेण। तस्यांछेकापन्हुतौ।
आयांतमिति। अलोल्यांरथ्यायां। एकाकाचिद्गाभावनितासंख्यापुरस्तात्तूरोमांचकंपा दृष्टिभिरनुभावैः व्यंज्य
मानमनुरागंएनंहरिंप्रणमंतिसति जुगूहे। गोपितवतीत्यन्वयः। लक्ष्यते। व्यज्यते। एवमिति। सूक्ष्मालंकारवदु
क्तिरूपव्यापारवर्णनमित्यर्थः॥ उदाहर्तव्यमिति। यथा। वक्रस्यंदीति। पद्यएवाली बालांसस्मितं प्राह मंदमुग्धाक्षीत्वं
५ मद्यपङ्क्यामि नाथेत्युत्तरार्थे:॥ निर्माणेनाथमित्युक्त्यात्रकाशनमितिबोध्यं। वस्तुसौंदर्येति। वेतसनिकुंजरूपवस्तु
सौंदर्येत्यर्थः। ध्वनिभावास्पदत्वात्। ध्वनित्वाश्रयत्वात्। उपसंहरति। अतइति। ऐश्वर्यस्यस्यभावाविष्करणमस्ती
त्यनेनान्वयः॥ ॥इतिव्याजोक्तिरलंकारः॥८६॥ गूढोक्तिरिति। यदन्योद्देश्यकंवाक्यंतदन्यंप्रतिकथ्यतेचेत्तदा

ग्रं ५

गूढोक्तिर्नामालंकारः। क्षेत्रं। सस्यादि। कलत्रंच अपेहि दूरीभव॥ अविवक्षितत्वादिति। अयंभावः। प्रकृताऽप्रकृतश्लेषेऽसावुद
न्वयः यमारूढेऽस्यादेऽप्रकृतार्थस्यप्रकृतार्थोपमानतयास्वीक्रियते। सर्वथैवप्रकृताऽसंबद्धस्यैवाप्रकृतार्थस्यकथनेऽसंबद्धा
मिथा र्थयिकत्वापत्तेः॥ अतः प्रकृतेपिश्लेषवादिनाऽप्रकृतस्यप्रकृतसंबंधोवाच्यः। सचनसंभवति। विवक्षाविरहादिति। तूतस्त
र्हिस्तु अप्रकृतार्थकथनं तत्राह। तस्येति। अप्रकृतार्थस्येत्यर्थः। ननुतादृशाविवक्षाविरहेपिनानार्थविन्यासमात्रेणा
स्तुश्लेषएवेत्याशंक्याह। विच्छित्तिविशेषादिति॥ विच्छित्तिविशेषाद्गूढोक्तिरवश्यंमंगीकार्येत्यर्थः। अतएवश्लेषमा चा द
त्रमिति। तन्मात्रनिराकरणमेवोपक्रांतंनतुश्लेषनिराकरणमिति। नाथइति। विपणिः पण्यवीथिका। पुष्पिणीरज
स्वला। आगमेनवेदेनलालनीयः। स्तुत्यः। आगमेनलालनीयश्च। रजनींव्याप्येत्यर्थः। ततसंयोगेद्वितीया॥ इतिगूढोक्ति
नामालंकारः॥८७॥ श्लिष्टगुप्तमिति॥ श्लिष्टेत्युपलक्षणं॥ अर्थशक्तिमूलगुप्तस्यापि गच्छाच्युतेत्यादेः संग्राह्य
त्वात्॥ वत्सइति। वत्से। लक्ष्मि। विषादं। खेदं। दरंच। उरूजवंमहावेगं। उर्ध्वप्रवृत्तंश्वसनं। श्वासंपवनंचसंत्यज्य
कंजंलंपातीति। तथावरुणः कंपश्च। गुरुर्महान्बृहस्पतिश्च। बलेप्रसिद्धं। तादृंइदाजंभितेनबलाख्यदैत्यनाशकेन

माने स्यतीति रताहृशमित्यादिरूपं। उन्नेयः प्रश्नः कल्प्यः प्रश्नो येन ताहृशस्योत्तरस्य। ईर्ष्यामानेति। ईर्ष्याहेतुकौर्मित्यर्थः। अउत्तमायाः पृश्वानापयुक्तायाः प्रश्नोत्तरस्येति। प्रश्नः उत्तरं च प्रश्नोत्तरान्तरे। ताभ्यामभिन्नं उत्तरं चित्रमित्युच्यत इत्यर्थः॥ केदारेति। दाराणां पोषणे रतः क इति प्रश्नः। केदारस्य क्षेत्रस्य पोषणे रता इति तदेवोत्तरं। के खेटाः। खे आकाशे अटंतीति प्रश्नस्य यदुत्तरं। वयः पक्षिण इति तदेव किं चलमि र
त्यस्य यदुत्तरं तत्रखेवयः। तारुण्यादीति। तेनाभिन्नं॥ इत्युत्तरालंकारः॥८३॥ सूक्ष्ममिति। पराशया
झ भिन्नस्य इतरस्मिन्परविषये साभिप्रायं चेष्टितं सूक्ष्मालंकारः। पराशयाभिज्ञस्य श्वासाविलरश्च।
तस्य साकूतचेष्टितस्य मर्यादापरविषय इति वार्थः। संकेतेति। संकेतकालमनोयस्य तज्जिज्ञासुमितिया
वत्। चिरं जारं। नेत्राभ्यामर्पितं आकूतं यस्मिन् ताहृशं लीलासंबंधिपद्मनेत्रेत्यादिक्रियाविशेषणं॥
इति सूक्ष्मालंकारः॥८४॥ पिहितमिति लक्ष्यनिर्देशः। तल्पं शयनं। वक्रेति। वक्रे अस्त्रवण शीलांरवे

इंणत्वा। अत्र श्रीकृष्ण सन्निधौ या हि इति प्रकारेण भयानिवारणव्याजेन सुराणांप्रत्याख्यानं वर्जनं कारयित्वा मंथोमंथनं
तेन मुग्धः पयोधियस्मै लक्ष्मीमदात् सवो दुरितं दहत्वित्यन्वयः। परेति। परवंचनाय गुप्तस्याविष्करणमित्यर्थः॥
त्रपयेति। लज्जया गुप्तस्येत्यर्थः। दृष्टेति। गोपेरयोरागः आसक्तिस्तया हृतयोपरागैर्धूलिभिर्व्याप्तयाच। गो पहृतयागवं
पेति संबोधनं वा। किंचित्। असमविषयं। पुत्का पुत्कृत्वा इ हत्वयि भूमौ च पतत्सु भावः पतितानां पतनं प्राप्ता
च विषमेषुः पचशरः तेन खिन्नमनसा। विषमेषु संकटेषु खिन्नमनसा च। अबलानां स्त्रीणां ब
लरहितानां च स्खलनं। सस्खलनं। गोष्ठं गोस्थानं। चेतो मलमिति। लंकां नयेयं इति इच्छतीत्यर्थो गु अ
प्तः। तदाविष्करणं चाङ्गीकरणा हृष्टा चेत्यनेन बोध्यं। शब्दशक्तीति। शब्दश्लेषवशान्नेत्यर्थः। क्री
डीकृतः संगृहीतः। गच्छामीति। अच्युत माद्विषये अस्खलितेति गुप्तोऽर्थः। चिरकाले तद्दर्शनं
नापि निसर्गोपि तु संभोगेन हि तु गुप्तोऽर्थः। विजनस्थयोः एकान्तस्थयोः। हृतश्वासोजनश्च
१ रित्यर्थे न दृशनैत्पत्ति १
नेन

लेस्मितिरूपत्तिर्यस्य तादृशस्येत्यर्थः॥ इतिलोकोक्तिरलंकारः॥ ९०॥ छेकोक्तिरितिलक्ष्यनिर्देशः॥ अर्थांतरगर्भितेति। अर्थांतरव्यं
जकता। समीपस्थ्छय द्वृत्तांतः पृष्टस्तत्समीपस्थ्छे सचायंत्रैलि। भ यदुच्यमानवृत्तांतस्तत्समीपस्थे त्यर्थः। तेन लोकोक्त्यनुवा
देन। मलयेति। भ्रांताः संभूताः। याताः गताः॥ विकासिनाममल्लिकाकुसुमानां परिमलस्य भारो यस्मिन् तादृशो यो भ्रमरस्तेन
ष्टः। हे चूत त्वं यद्युत्ससे हसे उत्साहवान् भवसि तदा तन्निरस्त हे नायकं घटय। अनया सह योजनीय। गवां निवर्तने परीता नोव्या
वर्तनेय एव प्रभवति स एव धनंजयोर्जुनः इत्यन्वयः॥ लिप्सया प्रोषितस्य यांगना तत्सखीवचनमिति संबंधः॥ आद्याः तेलं
गाः। इमामसखी गोप्रायो गोतुल्य॥ इति छेकोक्तिरलंकारः॥ ९१॥ वक्रोक्तिरिति। काकुध्वनेर्विकारः। अपराधस्य
अभिप्रेता दर्थादर्थांतरस्य। नंदीहरस्य गणविशेषः। दारुणा क्रूरेण त्येतदभिप्रेतं काष्ठेनेति कल्पनं। विकृतत्वं चकस्य
चिह्नर्णस्याचापोद्वापाभ्यां भवतीति। सीतां प्रतिरावणोक्तिः। पादत्रयं। चतुर्थस्तु प्रतिसीतायाः। तेन वपतिः स रामो युधि सं
ग्रामे पुरतो न स्थाता स्थास्यसीत्यर्थः। अलिशयेन लघुर्लघिष्ठः। तत्संबोधनं। इदं पादत्रयषष्ठाक्षरात्सुराणां त्रिवननव सममानां
र्णानां विलोपो यत्र तादृशां पुनः पठेत्यर्थः। नाद्वत्स्येष्वेद्रति। शब्दस्य परिवृत्त्यसहत्वादिति भावः। क्षिप्तेति। जलनिधिश्च
हिमवांश्च तत्कन्ययोर्लक्ष्मीपार्वत्योः क्रमेण स्वं कीलया सल्लापो मिथोभाषणं नोऽस्मान् त्रायतामित्यन्वयः॥ इत्थं

अन्यथारस्यर्थं स्थिता। चिंतिसंभावयति। तेन द्वयोरकीर्तिर्जातैव यथैव। आनंदं च यावदिति गूढोर्थः। आमंत्रणस्याच्युतेत्या
खे देर्भंग्यारचनया सूचितो योवस्थावस्थान भेदः तेनालसा। कव्यिनिबस्थेति। कविनिबद्धेति न वक्रा गूढस्येत्यर्थः। सुभ्रुवे
ति। शोभनभ्रूर्दयिता द्वयिम्यो। तयोः संबोधनं। कोपारोषः। विकारश्च। रागिण्यनुरागिणीति। अत्रैव नते नम्रे। इति चभ्रूयोस्य व
स्य विशेषणं। पक्षेरागिणि। रक्तिमतीले नम्रे इति द्वे संबोधनं। एवं द्वयोर्द्वयोरपि उच्चारणेनेति। स्वरविशेषसहकृतोच्चारणेनेत्य
कू म र्थः। इति विवृत्तोक्तिरलंकारः।।८८।। युक्तिरिति। स्वस्यमर्मगोपनक्रियया परस्यातिसंधानं वंचनं सा युक्तिर्नामालंकारः। त्वामिति
नायकं प्रति दूतीवचनं। पुष्पस्येदं पौष्पं। दंपत्योरिति। तस्य शुकस्यास्तिमात्रं अस्त्यर्थं निगदतः इति संबधः। फलशब्दो बीज
परः। गोपनीय विषयभेदस्य विच्छित्तिभेदाप्रयोजकत्वादाह। यद्वेति। नन्वेवं सत्यापातमात्रलोक्यस्यादौ व्याजोक्तिरेवेति त्रगुंक
विरुध्येत्याशंक्याह। एवं चेति। यद्वेति पक्षांगीकारश्चेत्यर्थः। एवं च पूर्वग्रंथः आद्यपक्षाभिप्रायेणेति भावः। इति युक्तिरलं
ध्यते कारः।।८९।। लोकेति। अनुकृतिरनुकरणं सहस्वेति। अर्थाद्विरहं। मासानभिव्याप्येत्यर्थः। नामैवेति। हे वरद तव ना
मैव वांछितदातृत्वं आख्याति। कथयति। अतस्त्वं वरदानमुद्रां इतरदेवतावन्न धारयसि। यतो विश्वप्रसिद्धतवाभिप्रकु

चार्य्यंतमित्यनेनोक्तः। ध्वनिभावास्पदानि। ध्वनित्वप्रयोजकानि। व्यवस्थितत्वादिति। शब्दार्थशक्त्याक्षिप्तोपि व्यंग्योर्थः कवि
ना पुनः। यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति। ध्वनिकारवचने न निर्णीतत्वादित्यर्थः। उक्ताविति। निषेधाभासमा
क्षेपं बुधाः केचन मन्वते॥ आक्षेपोन्यो विधौ व्यक्ते निषेधे च तिरोहिते इत्येताभ्यां नाहं दूती गच्छ गच्छसि चेत्युदाहरणयोः प्रतिपा
दितत्वादित्यर्थः॥ त्रासि स्तुत्वा बाधितुं प्रतिद्वंद्वित्वं॥ इति विधिरलंकारः॥ ९९॥ हेतोरिति। हेतुमता कार्येण मानच्छेदः का
र्यः॥ एष इति॥ विद्रुमच्छायः। प्रवालकांतिः। विगततरुच्छायश्च। मरुर्निर्जलदेशः॥ मान इति। मानेन छिन्ने अनिच्छिन्ने सति ए
वमुपशममेवारयति सति क्रिया लज्जायां क्षमां भूमिमालिखंत्या। भूमावुल्लेखनस्य तदनुभावत्वात्। स्यात्स्वैच। परिवृत्त्य पराङ्
मुखीभूयति स्थिति सति धैर्ये - करौ व्याधूय मम नानुमतमिति सूचनाय हस्तधूननं कृत्वा गते सति हे लज्जे त्वामनुसरंता
अमुना जनेनैतावत्फलं प्राप्तं॥ यस्मादेनापियो न स्पृष्टः स एव चरणौ स्त्रीयं स्पृष्टुं न सम्यक्मन्यते अनुजानातीत्यन्वयः। अ
त्र तु ष्णारूपहेतुतत्कार्ययोः स्पष्टं। अभिधाने भेदांतरमाह। हेतुहेतुमतोरिति। केचित्तु। भट्टोद्भटप्रभृतयः। तदुक्तं। हे
तुमता सह हेतोरभिधानं अभेदतो हेतुरिति। लक्ष्मीति। कटाक्षाः चिदुषां लक्ष्मीविलासाः इत्यन्वयः। विलासहेतौ विला
साभिन्नत्वेनाभिधानं। एवंविधलक्षणायाः प्रयोजनमाह। अत्र चेति। कार्यावश्यंभावश्च तच्छैघ्र्यं चेति विग्रहः। आदि

ना अपथ्याशनं रोग इत्यादौ उपादेयत्वानुपादेयत्वादि संग्रहः॥ आयुरिति। वीरः कलिंगेश्वरः। कलिंगदेशाधिपो राजा विजयते इत्य
न्वयः॥ कीदृशः दानरूपस्य महोत्सवस्य आयुरिति कार्याभिन्नत्वेनाभिधानं। एवमग्रेपि विशेषेण नतानां क्षोणीभृतां राज्ञां कलिताकृ
तिः धृताकारः। वीरश्रिया वीरलक्ष्म्याः निकेतनं स्थानं॥ इति हेत्वलंकारः॥ १००॥ भावस्येति। निर्वेदादेर्व्यभिचारिभावस्येत्यर्थः। प्र
त्यक्षप्रमुखाः प्रत्यक्षाद्याः ते च प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसंभव ऐतिह्याख्याः। विभवेत्यादि। रत्यादेः आलंबनोद्दी
पनरूपाणि नायकाचंद्रोदयादीनि कारणानि काव्यवर्ण्यमानानि विभावयंतीति व्युत्पत्त्या विभावपदेनाभिधीयंते। कार्याणि चकटाक्ष
रोमांचादीनि तथाविधान्येवानुपश्चाद्भवंतीति व्युत्पत्त्या अनुभावपदेनैव एषामेव कार्याणां रत्यादिनोत्पादने कर्तव्ये सहकारिभूतान्यु
त्कंठादीनि च व्यभिचारिपदेन विशेषादभितः संचरंतः कार्ये स्थायिनं चारयंतीति व्युत्पत्तेः। एवं रतिर्हासक्रियेनुरागादिपर्यायबोध्या
अंतःकरणवृत्तिः विकृतविदूषकादिचेष्टादर्शनजन्याचित्तस्य विकाररूपा वृत्तिर्हासः॥ इष्टलोभोनाशानिष्टलाभादिजन्याचि
त्तवृत्तिः शोकः। अस्मिस्थः। आदिपदेन क्रोधोत्साहभयजुगुप्साविस्मयनिर्वेदाख्यानां ग्रहणं परिग्रहः॥ विशेषपदेन च रत्यादे
स्थायित्वप्रयोजकं परिपुष्टत्वं कांताविषयत्वं इतरानंगत्वं च विवक्षितं॥ तदुक्तं। रत्यादिश्चेन्निरंगस्याद्देवादिविषयोथवा।
अन्यांगभावभाग्वा स्यान्न तदा स्थायिशब्दभागिति॥ स्थायिन एव चाभिव्यक्तस्य रसत्वं। यदाहुः॥ कारणान्यथकार्याणि

सहकारीणि यानि च॥ रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावास्तत्कथ्यंते व्यभिचा
रिणः॥ व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः॥ इति। अभिव्यक्तौ चास्यादीनां रसरूपाणां क्रमात्। शृंगा ना
स्य रहारैकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतशांतरूपविशेषसंज्ञा बोध्याः॥ निर्वेदादिति। निर्वेदग्लानिशं
काख्यास्तथासूयामदाश्रमाः। आलस्यं चैव दैन्यं च चिंतामोहः स्मृतिर्धृतिः। व्रीडा चपलता हर्ष आवेगो ज
षा डता तथा॥ गर्वो विषाद औत्सुक्यं निद्राविस्मृतिरेव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रय
स्त्रिंशदमी भावाः समाख्यातास्तु नामत इति भरतेनोक्ताः। लज्जादिना विकारगोपनं अवहित्थाख्यो
भावः। देवदत्तेत्याद्यपरिपुष्टत्वादेरूपलक्षणं॥ रतिरिति चापरिपुष्टहासादेः। अनौचित्येनेति। एतदु
दाहरणे दर्शयिष्यामः। मुनिरिति। कुंभसंभवोऽगस्त्यः एकचुल्लकेन समुद्रे पीयमाने तदंतर्गतयोर्यादवतारूपयो
ग र्मत्स्यकूर्मयोर्दर्शनेनेत्यद्भुतरसो मुनिप्रभावातिशयपर्यवसन्नतया तद्विषयरतिपोषकत्वात्तद्

अतिचपलैस्तनैः

गमिति भावः। अयमिति॥ भूरिश्रवसश्छिन्नं हस्तमालोक्य तद्वधूनामुक्तिः सपूर्वानुभूतायं कारयःपा करुणारसपरिपोषः क
दैति। निमिषमिव दिवसान्नूकदाने ष्यामीत्यन्वयः। कीदृशः कावेर्यां गंगातीरे वसन्तः। अये इत्यादाविति क्रोशान्तिस्यनेना
न्वयः। औत्सुक्यादिति। स्फाराः विस्तीर्णाः। प्रस्तौमि। प्रसंजयामि। भुवः पृथिव्याः इमां भुवं बिभ्रत् धारयमाणः। त्वस्य
स्यर्थीति। हे वीर संत्रासतो भयाद्धनेषु तरंगच्छती तव प्रत्यर्थिनः शत्रवः वसुंधरेशाः भूपाः ते प्रांतरूणी विलिंठितुं यो
ताः किराताः भिल्लाः तासां तरुणीनां उत्तरलैः अतितरां अतिशयेन लोलैः चंचलैः अपांगे नेत्रप्रांते श्रृंतैः ~~[illegible]~~ताः स्त (स्मे
ब्धाः प्रोद्धतरोमांचाः विस्मृताः उपक्रमो लुंठनरूपो यैस्तादृशास्तिष्ठंतीत्यन्वयः। अत्र शृंगारस्यानुरक्तराजवनिता
विषयत्वादनौचित्येन प्रवृत्तिरित्याभासरूपत्वं। त्वयीति अजनिष्ट अभूत्। युधि संग्रामे। तद्विषयेति। प्रभुवि
षयाद्द्विषद्गुणस्य या रतिः तद्रूप इत्यर्थः। अत्र शत्रुविषयकत्वरूपानौचित्येन प्रवृत्तत्वाद्भावस्याभासत्वं॥ पत्न्याम
इति। नायकस्य स्वमित्रं प्रति नायिकावृत्तांतोक्तिः। मयि तूष्णींभूते किमियं प्रतिपद्यते तत्पश्यामि इत्यभिप्रायेण मया
स्थैर्यं मौनरूपमालंबितमंगीकृतं। बहुवचनं सखीसमाजाभिप्रायं॥ एवं तयापि अयं खलु वृद्धो मां किमिति नालपति

नभाषते इति कोपः आश्रितः। अलं इत्यन्योन्यं परस्परं विलक्षि लक्ष्यरहिता या दृष्टिः तत्र चतुरे सव्याजं निमित्तांतरव्याज
सहितं। तदिति। युधि भवं निनीषा नेतुं मिच्छामि॥ यतः स्त्वैवं रूपेण समः समस्त्रियो नूलः पतत्रिणा हंसेन पादेन विलिख्य
अदर्शि। दर्शितः। एकेति। हे वीरक्षणमात्रेण युद्धप्रस्थानाद्भावीयो विरहः क्लेशः तदसहिष्णु लोलाक्षी दयितां पश्यतस्तथा प्रो
ढसंग्रामाडंबरमाकर्णयतस्त्वभवतः एका कपोलपाली झकरी घ्रचुलकैः कुसुमायुधस्य मदनस्येषुधीस्तूणमिव प्रव्यक्ता
पुंखावली शरपुंख पंक्तिर्यत्र तथाभूता भूत्। अन्या द्वितीया जेतुं जयशीलस्य मंगलपालिका मंगलरूपा पालिका करशाका
शादि निर्मिता उभयपार्श्वस्थस्तंभवृक्षादिषु बद्धा मार्गपालीति प्रसिद्धा तद्वद्भूत्। इत्यर्थः। अत्र प्रेमपदोक्तायाः रतेरपरि
पुष्टत्वाद्भावरूपं बोध्यं॥ क्वाकार्यमिति। शुक्रकन्यां देवयानीं दृष्टवतो राज्ञो ययातेरियं मुक्तिः। अकार्यं ब्राह्मणकन्यासक्तिः।
शशलांछनस्य चंद्रस्य कुलं सोमवंशः। अयं वितर्कः। तदुपद्य न भूयोपी सोत्सुक्यं। एव मग्रेपि। श्रुतं शास्त्रश्रवणमि
ति मतिः। अहोकोपेपीति स्मरणं। अपगतकल्मषाः कृतं सुकृते धीयें शांते। किंवादिष्यतीति शंका। स्वप्नेपीति दैन्यं।
हे चेतः स्वास्थ्यमुपेहीति धैर्यं। कः खलु धन्यो युवा तरुणो धरं धास्यति पास्यतीति चिंता विप्रलंभो वियोग इति पर्यायो॥ क्वा चिंता

तेति। इंद्रियाणां वर्गः समूहः मधुनि मद्ये निर्वचारं निर्वृतिं प्राप। कथंभूते संक्रांतिप्रियमुखप्रतिबिंबे। भौंत्रकोमला ग्र
पल्लववत्सुगंधौ स्वादुनि आस्वाद्ये। अदृष्ट नादयुक्त भ्रमरयुते। शीतस्पर्शे चेति। अत्र इंद्रियतत्त्वा तज्जन्य प्रत्यक्षमलंका
रः। किमिति। आरात्। दूरे इति। क्षणं संदिह्य कश्चिद्वृद्ध हंसवासिनां परोक्षैरदृश्यैः बिंबोकैरनाश्रित कथालापैः बिंबोको कमलानां
सु नारेंद्रियैर्कैलक्षणे हाव विशेषैः मुखमिति निश्चिकाय निर्णीतवान्॥ इति प्रत्यक्षालंकारः॥ १०१॥ यथेति। य
था शब्दोऽनुमानार्थः॥ यथा शब्दस्तु निर्दिष्टस्तु तुल्ययोगानुमानयोरिति विश्वकोशात्। तथा च चपल जलदरूपो धूमः व्योम्नः
आकाशस्य रंध्रमवकाशं यस्मात् स्थगयति। यस्मात् कीटमणयः खद्योताः स्फुलिंगानां रूपं दधति धारयंति यस्मात् ख
सुद्रूपाभिर्ज्वालाभिः उल्लसिताः प्रकाशीभूताः परितः पिंगवर्णाश्च ककुभो दिशः तस्मात् पथिकरूपाणां तरूणां खंडे स्मरलक्षणो
दवाग्निर्लग्न इति मन्ये इत्यन्वयः॥ प्रयोगस्तु पथिकतरुखंडं स्मरदवानलवत् व्योमव्यापि जलदधूमवत्वात्। इत्यादिर्बोध्यः।
यन्त्रेता इति। लहरीवृद्ध लाश्चंचलाः दृशो यासां ताः। एताः कामिन्यो यत्र जने भ्रूलतां व्यापारयंति प्रेरयंति। तत्रैव भ्रूसंज्ञाविषय ए
व यद्यस्मादमी मर्मस्पर्शिनो बाणाः सततं पतंति। तत्तस्मात् मंडली कृते चापे पुंखिताः योजितपुंखाः ये शराः ते पुनः खनू

मस्कारस्यैवलक्षणएवास्थितः। ततः ईजतांमृक्कपोलकांतिर्यस्य तादृशेनाधिकया। मुखे कोपानिर्नयाज्जातेसाति
तसाद्वयोर्दृष्टिपातेनैवाननतः प्रणामःसूरात्। किमसुभिरिति॥ व्याख्यातंचैतत्॥ तथेति। नलमुखचंद्रव्याख्याद्युः
स्मरस्येत्यर्थः। तत्रप्रसिद्धंखाकल्पितमितिभावः॥ इतिशब्दालंकारः॥१०४॥ निर्णेतुमिति। अस्थितिनिर्णेतुं
न्नाक्य इत्यन्वयः। व्यक्तमिति हेतुः। तर्कः। व्यक्तं प्रकटं चलीयात्तदा साज्जाह्नवी जलधिजलं नापूरयेत्। अ
न्यथापूर्णे सति अर्णः समुद्रस्य जलं गंगौघैर्निर्भासितं तिरस्कृतं सत् शंभुकंठसमानवर्णनीलं कंठस्यादि
त्यन्वयः॥ इत्यर्थापत्त्यलंकारः॥१०५॥ स्फुटमिति। हेतान्वितर्कयंतः स्तकेशीला अपि लोकास्तदवलग्न
मनुपलभ्यमानाः अपत्रपंत। तवावलग्नं मध्यं मस्त्यादिति स्फुटमेव॥ निश्चिन्वतो कुलपर्वतप्रोद्य युग्म स
त्वेनाध्यवसितं स्तनद्वंद्वं॥ अभूतेति। ईश्वरं प्रति भक्तस्योक्तिः। पूर्वमभूतं अभूतपूर्वं। तादृशां मम किंभा
वी न किंचिदेतत्। सर्वं शीतातपादिद्वंद्वं सहे। ह्रियतो मम सहजमेव दुःखमस्ति किंतु हे नाथ तव शरणागता
२ माधारं विनायदास्तेतत्तिहमकरध्वजस्येंद्रजालं मया रचितं। भ्रतीमइत्यन्वयः। इत्यनुपलब्ध्यलंकारः॥ २

५ बाढमित्युत्तरं अंगीकारे। अस्तीत्यर्थः। श्रोत्रीहीति पूर्वस्योक्तिः। युवेत्यादि पांथवचनं। सत्यं जीवतीति पुनः पूर्वस्य प्रश्नः ५

नांभक्तानांत्वदग्रे पराभवो नानुरूपो नोचित इत्यन्वयः। अथवा तव नानुरूप इत्यन्वयः। अत्र दुःखादेः संभवाख्यप्रमा
णसिद्धस्य कथनं। येनामेति। भवभूतेरुक्तिः। नामेति कुत्सने। नाम प्रकाश्य संभाव्यक्रोधोपगमकुत्सनइत्यमरः
त्र तेअस्ति वा तं अंतिप्रयत्नः। हियस्या निरवधिरयं कालः। पृथ्वी च विपुलेति क्रमेण योज्यं। अत्र कालो ह्ययमि
त्यादिनासोपपत्तिकं संभवाख्यप्रमाणमुपदर्शितं। भ्रातरिति। पथिकं प्रति ग्रामस्थस्य प्रश्नः। कुत आगत इत्य
नंतरं आगत इति शेषः। नगरादित्युत्तरं॥ चार्तेति पुनः पूर्वस्य प्रश्नः। जीवतीत्यादि सर्वं पांथवचनं॥ इति सं
भवालंकारः॥१०७॥ अनिर्दिष्टप्रवक्तृकेति। अनिर्दिष्टो विशेषतोनुक्तः प्रवक्ता यस्येत्यर्थः। एवं च एतदे
व ऐतिह्यलक्षणमिति दर्शितं॥ इत्यैतिह्यालंकारः॥१०८॥ यथासंभवमिति॥ संस्पृष्टिसंस्काराभ्यां द्व
योस्तद्भिकानां वेति यथासंभवमित्यर्थः। स्फुटेति। स्फुटमवगम्यमानो भेदो येषामिति विग्रहः। एकस्मि
न्वाचकेनुप्रवेशोवस्थितिः। एतत्सर्वमुदाहरणे व्यक्तीभविष्यति॥ कुसुमेति। माघे ऋतुवर्णने पद्यमिदं। अन्य

३ इत्यष्टौ प्रमाणालंकाराः ३

थाकुयापि वनितया चलितया कलः स्वरो मेखलायाः कांच्याः कलकलः कोलाहलो विदधे। किंभूतया। कुसुमसौर
भ्यलोभेन परिभ्रमतां भ्रमराणां संभ्रमेण त्वराविशेषेण संभृता समृध्या शोभा यस्यास्तथा अलकालोला यस्यां तादृ
शी दृक् यस्यास्तथाभूतयेति। आनंदेति।। आनंदेन मंथरं यथा स्यात्तथा पुरंदरेणेंद्रेण मुक्तमर्पितं माल्यं यत्र तादृ
शं।। महिषासुरस्य मौलौ मस्तके हठेन निहितं मंजु मनोरमं मंजीरस्य नूपुरस्य सिंजितं रणितं यत्र तादृशं म
नोरमं अंबिकायाः पदांबुजसदृशं चरणं मे नोऽस्माकं विजयाय भवत्वित्यन्वयः। अत्र पदांबुजमित्युपमित
समास एव। न तु मयूरव्यंसकादित्वात् एवं अंबुजमिति तथा सत्यंबुजे प्राधान्ये मंजीरसिंजितान्वयायोगादि
त्युपमैव न तु रूपकमिति ज्ञेयं।। इति संसृष्टिः।। तलेष्विति। तदा मारुतकंपितानां महीरुहाणां तले पुष्पछाया अवेपं
ते कंपमाना आसन्। तत्रोत्प्रेक्षते। शशांकरूपेण सिंहेन छिन्नाः क्षताः तमोलक्षणा गजानां शरीरखंडा इवेति।
गुणानां चेति तार्तीयाधिकरणे सूत्रं।। अस्यार्थः।। गुणानां गुणभूतानां पदानां पदार्थत्वात् परस्परमसंबंधः।।
१ कुतः समत्वात् अप्रधानत्वसाम्यादिति। यथा भाष्यकारमते पवमानेष्टीनां आधानस्य चाहवनीयाद्यर्थत्वात्परस्परं नांगांगीभावसंबंधः १

यथा वार्तिककारमते अग्निसमिंधनार्थानां मंत्रविशेषरूपाणां निविदां सामिधेनीनां चेति संक्षेपः। एतदधिकरणसिद्धां
तपूर्वपक्षौ प्रकृतानुपयोगान्न दर्शितौ।। स्वरूपनाशेति। स्वस्वरूपनाशमुपचरितं यदाकृतिलवनमित्यर्थः।। नन्वेवमपि
तमोंशेऽस्य विशेषणस्यानन्वया कथं रूपकसिद्धिरित्याशंक्याह। स्वरूपेति। (अंगीकारेण) निगीरणेन।। लक्षणामूलेति। सा
ध्यवसानलक्षणामूलेत्यर्थः। तथा च तमोंशे उपचारेणान्वय इति भावः।। नन्वेवं सति उपमांगीकारेऽपि किं बाधकमिति वाच्यं तदं
गीकारे प्रधानान्वयेप्युपचाराश्रयणापत्तेः तदपेक्षया अप्राधान्येन तमोंशे तदंगीकारेण रूपकस्यैवौचित्यादिति। नच्छायाना
मिति।। सिद्ध्येदित्यनुवर्तते। उत्प्रेक्षा न सिद्ध्येदित्यर्थोऽन्वयः।। इवशब्दस्य सादृश्ये प्रसिद्धतरत्वेनासति तात्पर्यग्राहके सं
भावनाबोधकत्वासंभवादिति भावः।। रूपकं विनापि उत्प्रेक्षायास्तात्पर्यग्राहकमस्तीति शंकते। नन्विति। एवमित्युक्तेन तु
तर भोगजानामित्युक्तेन तथा च साधकं स्यात् साधकांतरादूषकत्वाद्रूपकस्योत्प्रेक्षांगत्वमविकलमिति भावः।। आवलिरिति।।
सवितुः सूर्यस्य तुरगावलिः अश्वपंक्तिर्नोऽस्माकं नवतु। केव। नभश्रियः गगनलक्ष्म्याः मरकतमणीनां एकलता एका
वलीवेत्युत्प्रेक्षा।। सूर्यतुरगाणां हरितवर्णत्वात्। कथंभूताः। सम्यग्गतिलंघिताः तुंगाः उच्चाः पयोधराः मेघाः यया। एका

वल्लीपक्षे पयोधरौ स्तनौ। तथा स्फुरितो दीप्तिमान् मध्यगतः अरुणरूपो नायको नेता सारथिर्यस्याः सा। पक्षे अरुणः
आरक्तः नायको हारमध्यमणिः। नायको नेतरि श्रेष्ठे हारमणावपीति विश्वः। अतिशयोक्त्या मेघानां स्तनत्वेनाध्यवसा
नरूपया। मार्गे वेत्यन्वेनेति लतडलन्याये न स्फुटावगम्यमानभेदायाः संसृष्टेः सकाशात् वैलक्षण्यं दर्शितं। एवम
ग्रेऽपि। एकस्य चमत्कारिजनने परोपेक्षित्वादंगांगिभावमाशंक्याह। परस्परेति। अंगुलिभिरिति। रात्रिः अंगुलिभिरि
व मरीचिभिः केशसंचयमिव तिमिरं संगृह्य कुड्मलीकृतसरोजलोचनं लोचनमिव सरोजं यत्र तादृशं रजनीमुखं चुं
बतिवेत्यन्वयः। तत्स्थायेति। उपमाबहुत्वे संदर्भे पाठादिति अर्थः। मुखेति। मुख्यार्थरूपं यत् कुड्मलीकरणरूपं लिं
गं पुष्पो साधारणधर्मः तस्यानुकूल्यादित्यर्थः। अन्यथा पकत्वाविशेषात्। अंगत्वाविशेषात्। चंद्रस्य चुंबनोत्प्रेक्षाया
सा। दापस्य व्यवहारसमारोपात्मकसमासोक्तौ चापेक्षितं नायकसाधर्म्यस्योक्तोपमाभ्यां समर्पणात् कथं तयोस्तदंग स्य
त्वमिति निराकृतं। यद्यपीति। मरीचिभिरिवांगुलीभिः तिमिरमिव केशसंचयमित्येवंरूपमित्यर्थः। एकैकविष कं
य[illegible]स्यार्थद्वयस्याभेदाध्यवसानेनेत्यन्वयः। अतयोः वाक्यसमोक्तोपमयोरावश्यकाभेदाध्यवसायेनोपपत्तौ से

१ मरीचिभिरिवेति २

कृतमन्वयांतरसमासांतरकल्पनागौरवेणेत्याशयेनाह। यद्वेति। ननु दीर्घेणेत्यादौ पूर्वनिपातनियमानुरोधेन यथा
संख्यत्रसंख्यक्रमपरित्यागः। तथा चांगुलिमरीच्योस्तनुत्वनीरंध्रत्वाभ्यां तिमिरकेशसंचययोरावर्णरूपत्वनीलत्वाभ्यां
सरोजलोचनयोर्दीर्घत्वकांतिमत्त्वाभ्यां सादृश्यं च बोध्यं। प्रातस्विकरूपेण। अंगुलित्वमरीचित्वादिना। अनुमतेति। अन ग
नु गतं यत्सादृश्यं प्रयोजकरूपं तंतुत्वादिकं तेनेत्यर्थः। एतच्च सादृश्यमतिरिक्तमित्यभिप्रायेण सिद्धांतादिति तदुक्तौ। सा
दृश्यं त्रिविधं। भेदप्रधानमभेदप्रधानं भेदाभेदप्रधानं चेत्युपक्रम्य विद्यानाथेन उपमानन्वयोपमेयोपमास्म
रणानां भेदाभेदसाधारणसाधर्म्यमूलत्वमिति। ननु भेदाभेदरूपानेकाद्वयोपेतायाः उपमायाः भेदांशस्यानुपयोगात्क
र्थं तस्याः उत्प्रेक्षाद्युपयोगित्वमित्यत आह। न हीति। प्रकाशश्च शीतापनयनं चेति द्वंद्वः। शीतालुः शीतार्तः। शीतोष्ण
लप्रेप्स्यस्तद्दहन इति चालुः। उक्तसिद्धांते निर्युक्तिकत्वेनाश्रयेयत्वमाशंक्य क्रमानं प्रस्ताह। एवमिति। पांड्योयमिति। पां लि
यं ड्यनामा नृपः अद्रिराज इव भाति। कथंभूतः। अंसयोरर्पितो लंबो हारो येन सः। तथा हरिचंदनेन रक्तचंदनेन कृतः अंगरा
५ कुलेपनं गौ येन स तथाभूतः। अद्रिराजः कीदृक् बालातपेन रक्तानि सानूनि प्रस्थानि यस्य सः। तथा निर्झरस्योद्गारेण उद्गमनेन अनुले
पनेन सहितः। पिनद्धीति व्याख्यातं प्राक्। पौर्वापर्येणेति तथा मत्कारप्रयोजकपौर्वापर्यघटकत्वेन भेदानवभासात् संसृष्टिविलक्षणत्व

च

मिति भावः दर्शादिवत्। दर्शपूर्णमासादिवत्॥ अयं च भिन्नकालीनयोरपि समप्राधान्ये दृष्टफलं। तत्र स्वर्गः प्रकृते तु चमत्कृतिविशेषः॥ शात्रीनपि
ति। अत्राजस्येंदुमत्याः स्वयंवरे समगुणयोरजेंदुमत्योर्योगे नृपतीन्नियेषां ते पौरा नागरिकाः नृपाणामन्येषां श्रवणयोः कटु पीडाके
रमिति पूर्वार्धरूपं एकमेव वाक्यं विवक्षुः उच्चारयामासुरित्यन्वयः। तेन सर्वेनाम्नासा इंदुमती। बिंबभूतोर्थ मृः। अजकर्मकवरण
लत्र तास्मिन्पक्षे विलीयेति। अग्निसंयोगोऽम्बुन घृतादिवत्। केनापि हेतुना विलीनतां प्राप्येत्यर्थः॥ विकसितेति। विकचे ज
डभावः शैत्यं। मदन एव शिखी वह्निः संरंभस्तापस्यर्य॥ सिक्तमिति। स्फुटितकुंभान्निसृत्या श्वेतीकृते श्वेतीकृतेः जलैः सिक्तमौ
क्तिकमित्यन्वयः॥ मुखेनेति॥ संदोहः समूहः। लक्षयित्वेति। स्फुटमेकत्र विषयशब्दार्थालंकृतिद्वयमिति सूत्रादित्यर्थः। संघटितां स्व
कमले अथो अनंतरं दिवसरूपमरविंदं स्वं चुकोचेति संकोचमगमत्॥ कीदृक् स्पष्टमुद्रसेतः उल्लसंतः किरणा एव केसरा हणि॥
यस्यास्तथाभूता सूर्यबिंबरूपा विस्तीर्णा कर्णिका वैचोयस्यतत्। श्लेष प्रकाशाभावेन परस्परं मिलिता अष्टदिश एव ग
दलानां कलापः तन्मुखेनावतारो यस्यास्तादृशी बलाऽन्धकारश्रेणी मधुपावलिर्येन तथाभूतमित्यर्थः॥ पदभेदेनेति॥ रूपा
सो णत्थि एत्थ गामे जो एअ महमहंत लअण्णं। तरुणाण हिअअलूडिं परिसप्पंतिं निवारेइ। स नास्त्यत्र ग्रामे एतां
स्फुरल्लावण्यां तरुणानां हृदयलुंठने परिसर्पंतीं निवारयंतीति संस्कृतं। अत्र पूर्वार्धे अनुप्रासस्तृतीयपादे रूपक

मिति तयोः संसृष्टिः॥ वाच्यप्रतियोगित्वादिति। वाच्यप्रतियोगिप्रतिसंबंधि यस्य तद्वाच्यप्रतियोगिकं तत्त्वादित्यर्थः॥ एवं चाकाव्या
वाच्यहृस्यानुप्रासादेः शब्दालंकारस्य तदनुप्रवेशेन वाचकानुप्रवेशो इति युक्तं वक्तुं युक्तमिति भावः॥ सत्पुष्करेति॥ यस्यां
नगर्यां एणीदृशः उद्यानसंबंधिवापीपयसि वृनाद्यगृहे रमंति॥ क्रीडंति। कीदृशः समीचीनैः पुष्करैः कमलैर्द्योतितोयतरंगा
तच्छोभा वा तिगृहे गृहपक्षे समीचीने पुष्करे वाद्यभांडमुखे द्योतितौ यौ रंगोन्नत्यभूमयः मिस्तच्छोभिनीत्यर्थः॥ पुष्करं क
रिहस्ताग्रे वाद्यभांडमुखे जले॥ व्योम्नि पद्मे खड्गफले पद्म इत्यमरः॥ श्लेषभित्तिकेति। श्लेषो भित्तिरिव भित्तिर्मूलं
यस्येत्यर्थः॥ रागवतीति॥ रागो अनुरागो रक्तिमा च। अंबरमाकाशं वस्त्रं च॥ नन्वत्र विशेषणसाम्यात्याऽध्य
वसायापेक्षणेऽपि सत्पुष्करेत्यादौ शब्दसाम्यमात्रेणापि उपमोपपत्तेर्नदपेक्षेत्यत आह। शब्देति। शब्दतो अर्थतो वे
ति। शब्दप्रयुक्तमर्थप्रयुक्तं वा यत्कविसंमतं साम्यं तत्प्रतिपादन इत्यर्थः॥ सर्वविधे सर्वप्रकारे यथेति। आक्रो चं
द इति धात्वनुसाराच्चेदं पदमन्वर्थं। अन्वर्थोऽन्वर्थनामतस्मात्। मत इदं यस्याप्युक्तत्वात्। विधुकरेति। स हंसः
तत्र भेमीवनेनंदमयंत्या उद्यानेन हृतः चेतो यो आकुलीकृतः॥ कथंभूतेन। चंद्रकिरणाश्लेषादानेरंगीकृतैर्नि

निर्विदे:पूर्णैश्चंद्रकांतघटितैस्तरुणामाल वालैःविफलीकृतजलसेकप्रकाररूपगौरवेणेत्यर्थः॥शुद्धव्यवस्थितेति।शब्दप्रयु
क्तेत्यर्थः॥तथाचसमप्राधान्यमथभेदविषयमितिभेदः॥प्रतिक्षिप्यतेनिवार्यतेकोद्यतरमनेनेतिप्रतिक्षेपोविरोधः॥मु
क्ताइति।विदुषांमंदिरेषुभवनेषुकेलीसुरतक्रीडायांविछिन्नसूत्रात्हारात्गलिताःसमार्जनीभिरपसारिताःप्रातः
कालेऽंगणप्रांतेमंदंमंदंचलताबालानांचरणलाक्षारसेनअरुणाःमुक्ताःदूराद्दाडिमबीजशंकितधियःक्रीडाशुकाःय
त्कर्षंतिआकर्षंतितद्भोजनृपतेस्त्यागस्यदानस्यैव लीलायितमित्य ~~र्थः~~ त्यन्वयः।तत्रैवबालांघ्रिलाक्षाइत्यत्रैवाव
क्ष्यमाणेति।शंकितधियइतिवक्ष्यमाणेत्यर्थः॥तयोस्तद्गुणकाव्यलिंगयोः।तन्मूलःसंकरमूलः।ताभ्यांसंकरभ्रांतिमत्त्वात
स्य योःसंकरभ्रांतिमतोः।तस्यउदात्तस्याहेतुमतःकार्यस्याभेदकथनंतत्यागलीलायितस्य कार्यमितिवक्तव्येतदेवलीला
यितमित्यभेदकथनं॥तदीयेति।राजकीयेत्यर्थः।अतथ्यौदार्येति।असत्यौदार्येत्यर्थः॥तन्मूलकस्येति।वितरणो तथ्ये
त्कर्षपर्यवसायिहेत्वलंकारमूलकस्येत्यर्थः।ननुराजसंपत्समृध्येर्व्यंजनागम्यत्वेनात्मकथनात्कथंतद्गुणेनात्मकोदा
त्तालंकारेणसहैकस्यैवाचकानुप्रवेशकथनमित्याशंकायामाह।वाचकशब्दस्येति।त्रयाणामिति।एकउदात्तातिश

योस्तयोःपरोहेत्वस्तुत्त्योःअन्योन्ययोरुदात्ताप्रस्तुतैशंतांकुरायोरन्यतरयोरित्येवंत्रयाणांपरस्परमित्यर्थः॥उदा...
हेत्वलंकारांगतयाःपूर्वमुक्तत्वादुदात्तातिशयोक्तिसंकरस्यापितदंगत्वमितिशंकानिरस्यति॥उदात्तादीत्याहि
प्रस्तुतप्रशंसापरिग्रहः॥तत्रापिनिरतिशयैश्वर्यवितरणोत्कर्षपर्यवसायिनोहेत्वलंकारस्यैवतादृशवि
कार्यपरिष्कारद्वारातद्भतैस्यप्रस्तुतराजसंपदुत्कर्षप्रशंसारूपायाअप्रस्तुतप्रशंसायामंगत्वंनतद्गत...
म्य नारूपात्युक्तिसंकरस्याप्यपेक्षतेतिभावः॥यथायोग्यमिति।तथाहि।उदात्ततद्गुणयोरंगांगिभावसंकरस्यभ्रांति
सु मदुदात्तयोरंगांगिभावसंकरस्यौदात्तांगकहेत्वलंकारादिसंदेहसंकरस्यचांगांगिभावेनसंकरइतिसूक्ष्ममतिभि
रूह्नीयं॥स्वकीर्त्यनुवृत्तयेग्रंथनामस्वनामचोपनिबध्नन्ग्रंथपूर्तिमनुवदति॥अनुमिति॥स्वग्रंथस्यप्रामा
णिकत्वंसूचयितुमाह॥चंद्रालोकमिति॥शारदागमनसंजातकृश्चंद्रालोकमूलभूतोग्रंथःशारदागमनेनचं
चंद्रस्यालोकइतिभावः॥श्लेषः॥तस्माच्चकुवलयानंदइ ~~ति~~ श्लेषइतिशिवमास्तां॥श्रीः॥विद्वद्वृंदमहामान्यरा

४ स्यैचांगीभावेनसंकरः।तथाभ्रांतिमदुदात्तयोरंगांगीभावसंगैकरस्यैं
१ ग्रंथोऽभूत्कुवलयस्यकुमुदस्यआनंदद... १

२३

मच्चंद्रात्मजन्मना ॥ विदुषा वैद्यनाथेन कृतालंकारचंद्रिका ॥ १ ॥ एनां कुवलयानंदप्रकाशनविशारदां ॥ विदांकुर्वंतु वि तो

द्वांसः काव्यतत्त्वविदां वराः ॥ २ ॥ असौ कुवलयानंदश्चंद्रिकां कोऽपि तत्र [illegible] पि सन् ॥ प्रतिष्ठां लभते नैव विनालं

कारचंद्रिकां ॥ ३ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणसद्रामभट्टात्मजवैद्यनाथकृतालंकारचंद्रिका

ख्या कुवलयानंदटीका समाप्ता ॥ श्रीविजयादुर्गार्पणमस्तु ॥ ब्रह्मनोत्तमपि क्लीबमनःसोऽत्तंन

पश्यति ॥ किंचित्रं लोकजनकं वाक्यं तानेत्यकांतकं ॥ १ ॥ अबले सकिले तपस्यतां मुखभा ते

वो गमितो नपंकजेना कथमादिमवर्णतां स्यसजस्य द्विजराजेन क्षतो रनिगत स्य ॥ २ ॥

मकोद्य

तातिश

128

7

शाल्यनुमितिजनकज्ञानविषया साध्यतावच्छेदकावच्छिन्नेत्यादि व्याप्तिः। साध्यतावच्छेदकनिष्ठसाध्य

शाल्यनुमितिजनकज्ञानविषया साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रकारताशाल्यनुमिति

बंधावच्छिन्नप्रकारतानिरूपितसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रकारताशाल्यनुमिति

ध्यतावच्छेदकोपलक्षितसाध्यसामानाधिकरण्येत्यादिव्याप्तिर्वैरिति ॥ तथाचोपलक्षितसाध्यका

तरभावविनज्ञानाद्व्याप्तिरिति फलितं ॥ ॥ ७ ॥

च्छिन्नसाध्यप्रका... ...शाल्यनुमितिजनकज्ञानविषया साध्यतावच्छेदकावच्छिन्नेत्यादि व्याप्तिः। साध्यतावच्छेदकेनिष्ठसाध्य
...दकेताघटकसं... ...बंधावच्छिन्नप्रकारतानिरूपितसाध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठप्रकारताशाल्यनुमिति
...ज्ञानविषयासाध्... ...यतावच्छेदकोपलक्षितसाध्यसामानाधिकरण्येत्यादिव्याप्तिर्वैरति॥ तथाचोपलक्षितसाध्यका
...लिङ्गं यथोक्तव्याप्तेर्भावेपिनज्ञानाध्याप्तिरितिफलितं॥ ॥ ७॥